


# सोमज्योतिः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य त्रैमासिकं वार्तापत्रम्

**Shree Somnath Sanskrit University**

Rajendra Bhuvan Road, Veraval - 362 266. Gir - Somnath (Gujarat)

Ph. : 02876-244532 Fax : 02876-244417 Website : www.sssu.ac.in

ख्रैस्ताब्दः २०१९ | वैक्रमाब्दः २०७५ | अङ्कः २०-२१ (संयुक्ताङ्कः) | अप्रैल-सितम्बर २०१९


## कुलपतिवाक्



श्रीरामानुजो भरतः चित्रकूटे श्रीरामम् अयोध्यां प्रत्यावर्तयितुम् अशक्तो यदा अयोध्यामिव विशालं राज्यं शासितुं स्वस्याक्षमतां प्रकटयति तदा श्रीरामस्तं वदति –

“ आगता त्वामियं बुद्धिः स्वजा वैनयिकी च या ।
भृशमुत्सहसे तात रक्षितुं पृथिवीमपि ॥ (रामायणम् २/११२/१६)

अर्थात् सहजा किञ्च वैनयिकी बुद्धिः सम्पूर्णां वसुन्धरामपि रक्षितुं क्षमा। पूर्वकाले भारतस्य गौरवमय्या एतया बुद्धिद्वय्या कुटुम्बकरूपा सम्पूर्णवसुधा रक्षिता सात्त्विकचेतनया सर्वेषामपि कल्याणं विचिन्तितं च। तदर्थं सत्यम् अहिंसाऽपरिग्रहोऽस्तेय इत्यादीनामेव धर्मत्वम् आख्यातं किञ्च तादृशधर्ममार्गस्यैव आदर्तव्यत्वम् उररीकृतम्। विश्वस्येतिहासे ये केचन सिकन्दर-हिटलरादयः आत्मनो विश्वविजेतृत्वं कल्पितवन्तः तेषां पार्श्वे एषा सत्याहिंसास्तेयाऽपरिग्रहान्विता स्वजा बुद्धिर्नासीत्, अपि त्वासीद् दम्भदर्पपारुष्यादिदूषिता विध्वंसिका वृत्तिः। न चासीत्तेषां वैनयिकी बुद्धिरित्यतः विश्वविजयसङ्कल्पस्तेषां केवलम् इतिहासग्रन्थैकरूढस्तिष्ठति। अपरत्र, भारतवर्षस्य प्रत्येकस्मिन् काले त्यागतपोमयो विवेको विनयश्च अखिलस्याभ्युदयस्य निःश्रेयसस्य च उपयोगः न केवलम् आत्मनः कृते, अपि तु सर्वेषां कल्याणायाभिवृद्धये च भवेदिति विश्वविजयिनी गुर्वी भावना सञ्चरतितराम्।

श्रीसोमनाथसंस्कृतविश्वविद्यालयः कायेन मनसा वाचा तदभ्युदयनिःश्रेयसाख्यं धर्मं लक्ष्यीकृत्य सुतरां वर्धमानोऽस्ति। विद्यालय-महाविद्यालय-विश्वविद्यालयच्छात्राध्यापकानां पूर्णसहभागितया उत्कलकलयान्वितं “कीचकवधे”ति संस्कृतलोकाभिनयसहितयोपस्थापनया च संस्कृतसप्ताहोत्सवः (८-१४ अगस्त) सोल्लासम् अनुष्ठितः। सम्पूर्णगुजरातराज्ये विश्वविद्यालयेन सह सम्बद्धानां महाविद्यालयानां तथा च स्वपरिसरगतानाम् अधीतिनां शारीरिक-शैक्षणिक-सांस्कृतिकोपलब्धीः पुरस्कर्तुं “स्फुरणम्” इत्याख्यः त्रयोदश-युवमहोत्सवः (२५-२७ सितम्बर) परिसरे समायोजितः। साहित्ये छात्राणां ज्ञानपूर्वककौशलाभिवृद्ध्यर्थं साहित्यविभागे कार्यशाला आयोजिता, तथा च वागर्थविचारमाश्रित्य राष्ट्रियसङ्गोष्ठी अप्यायोजिता। गार्गीमहिलाछात्रावास-पातञ्जलयोगभवनेति भवनद्वयस्य निर्माणकार्यं सशिलान्यासं प्रारब्धम्।

छात्राः वर्तमानाः सन्तोऽपि भविष्णवः, भविष्यस्त्रष्टारो भवन्ति, तेषां ज्ञानराशिः वर्धताम्, उत्तमं स्वास्थ्यं स्वच्छता च तेषां सर्वथा आनुकूल्यमाचरेताम्। अध्यापकैः पदाधिकारिभिः कर्मचारिभिश्च ज्ञानयज्ञस्थलेऽस्मिन् स्वकर्तव्यकर्माहुतयो दीयन्ताम्। विश्वविद्यालयोऽयं “पूर्णता गौरवाये”ति स्वध्येयं साधयितुं सर्वात्मना पूर्णतादिशि निरन्तरं समेधताम्। इति॥

**गोपबन्धु मिश्रः**

कुलपतिः



गुजरातराज्यस्य भूतपूर्वमाननीयराज्यपालस्य किञ्च श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पूर्वकुलाधिपतेः **श्री ओ.पी. कोहलीवर्य**स्य कार्यकालसमाप्तौ गान्धिनगरे राजभवने समायोजिते सौप्रस्थानिकसमारोहे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य **कुलपतिः प्रो. गोपबन्धुमिश्रः**, **कुलसचिवः डॉ. दशरथ जादवः** च माननीयराज्यपालमहोदयेन सह शुभमेलनम् अकुरुताम्। आभ्यां कुलपतिकुलसचिवाभ्यां माननीयकोहलीवर्यस्य आरोग्याय अपि भगवतः सोमनाथस्य प्रार्थना कृता। माननीयकोहलीवर्येणापि श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य उज्ज्वलभविष्याय शुभकामनाः पाठिताः।

Chief Editor
**Prof. Gopabandhu Mishra**

Publisher
**Dr. Dashrath Jadav**

Managing Editor
**Ravindra S. Kale**

Editor
**Dr. Janakisharan Acharya**

News/Reports of events are invited for their publication in **SOMAJYOTIḤ** (Quarterly Newsletter of Shree Somnath Sanskrit University) from affiliated colleges, recognized study centers & approved research centers of Shree Somnath Sanskrit University in Sanskrit, Hindi or English.

News/Reports of events can be sent on following mail/postal address:

**Address:**
**The Editor**
"SOMAJYOTIḤ"
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval,
Dist. Gir-Somnath, Gujarat–362 266.
(O) 02876-244532
**E-mail:** editor.somjyoti@gmail.com

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य जालपुटेऽपि
''सोमज्योतिः'' द्रष्टुं शक्यते -
www.sssu.ac.in

Statement about the ownership and other particulars about newspapers
**SOMAJYOTIḤ**
**FORM IV**
(See Rule 8 under Section 5 of the Press and Registration of Book Act,1867)

1. Place of the Publication : Shree Somnath Sanskrit University Veraval, Gujarat – 362266
2. Periodicity of its Publication : Quarterly
3. Printer's Name : H.K. Offset
   Nationality : Indian
   Address : 1st Floor, Vraj Plaza, Jain Derasar Road, Veraval, Gujarat-362266
4. Publisher's Name : The Registrar
   Nationality : Indian
   Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
5. Editor's Name : Prof. Gopabandhu Mishra
   Nationality : Indian
   Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
6. Names & Addresses of Individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266

I, Dr. Dashrath Jadav, Registrar, Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.

Dr. Dashrath Jadav
Signature of Publisher

# विश्वविद्यालये समाचरितः अन्ताराष्ट्रिययोगदिवसः-२०१९

योगः भारतस्य निधिः वर्तते। वर्तमानकाले योगस्य महत्त्वम् आवश्यकताञ्च विज्ञाय विश्वस्मिन् विश्वे जूनमासस्य २१ दिनाङ्के अन्ताराष्ट्रिययोगदिवसः समाचर्यते। श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रतिवर्षमिव ऐषमः पञ्चमः अन्ताराष्ट्रिययोगदिवसः २१-०६-२०१९ दिनाङ्के विश्वविद्यालयपरिसरे समाचरितः। प्रातः षड्वादनात् अष्टवादनं यावत् समायोजिते अस्मिन् योगदिवसे विश्वविद्यालयस्य प्राध्यापकाः, अधिकारिणः, कर्मचारिणः, छात्राः, वेरावलनगरस्य नागरिकाः समुपस्थाय सामूहिकरूपेण योगासनानि अकार्षुः। कार्यक्रमस्य आरम्भे विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः, कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकभवनाध्यक्षा प्रो. अर्चनाकुमारीदुबे, विश्वविद्यालयसञ्चालित-संस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या, वेरावलस्थः प्रसिद्धः वैद्यः डॉ. जयेश वघासीया च दीपप्राकट्यमकार्षुः।

प्रसङ्गेऽस्मिन् कुलपतिः प्रो. गोपबन्धुमिश्रः अवादीत् यत् योगः न केवलं युवभ्यः परं सर्वेभ्यः अमृतम् अस्ति यस्य नियमितसेवनेन जनाः न केवलं दीर्घायुष्यं प्राप्नुवन्ति अपि तु अवसादग्रस्ताः रोगग्रस्ताश्च जनाः अपि जीवने सुखं शान्तिं च प्राप्तुं शक्नुवन्ति। योगः अस्मभ्यम् असङ्क्मितेभ्यः रोगेभ्यः रक्षणं दातुं शक्नोति। किञ्च समग्रे विश्वे सामूहिकरूपेण योगाचरणद्वारा अयं योगः सर्वान् योजयित्वा परस्परम् आदरभावं जनयति।

अस्मिन् अन्ताराष्ट्रिययोगदिवसे अनुस्नातकविभागस्य छात्रैः सह संस्कृतमहाविद्यालयस्य छात्राः, वेरावलनगरस्थविविधविद्यालयानां छात्राः अध्यापकाः, प्रबुद्धाः नागरिकाः च सोत्साहं भागमवाक्षु। ५३४ बालकाः, ७२८ बालिकाः, ६२ अध्यापकाः, ४६ अध्यापिकाः, ५२ शिक्षणेतरपुरुषकर्मचारिणः, १० शिक्षणेतरमहिलाकर्मचारिणः एवञ्च आहत्य १४३२ सङ्ख्याकाः जनाः अस्मिन् अन्ताराष्ट्रिययोगदिवसे विश्वविद्यालयपरिसरे उपस्थिताः आसन्। विश्वविद्यालयस्य राष्ट्रियसेवायोजनासमन्वयकः किञ्च शारीरिकव्याख्याता डॉ. जयेशमुङ्गरा अत्यन्तं सरलशैल्या मञ्चसञ्चालनपूर्वकं योगासनविषये प्रायोगिकं मार्गदर्शनमकरोत्।










# कुलपतेः दैनन्दिनी

०२-०४-२०१९ विश्वविद्यालयसम्बद्धकार्यार्थं गीरसोमनाथजनपदस्य समाहर्त्रा (जिलाधिकारिणा) सह मेलनम्।

०३-०४-२०१९ विश्वविद्यालयपरिसरे शिक्षाशास्त्रिवर्गस्य प्रारम्भविषये NCTC अध्यक्षया डॉ. सबीरबेदी महोदयया सह नवदेहल्यां मेलनम्।

०४-०४-२०१९ उपराष्ट्रपतिवर्येण सभाजितानां विदुषां सम्मानकार्यक्रमे राष्ट्रपतिभवने विशेषोपस्थितिः।

०५-०४-२०१९ अहमदाबादनगरे उच्चतरशिक्षायोगेन आयोजितायां कार्यशालायां विशेषज्ञरूपेण उपस्थितिः।

०६-०४-२०१९ कालुपुरस्थ-स्वामिनारायणमन्दिरे साधुभिः सह मेलनम्।

०८-०४-२०१९ परीक्षासमितेः गोष्ठ्याः अध्यक्षतामकरोत्।

१७-०४-२०१९ विश्वविद्यालये इ-लाइब्रेरी निर्माणविषये जर्मनदेशस्थ-हैडल्बर्गविश्वविद्यालयेन सह विडिओ-कॉन्फ्रेसिंग् द्वारा वार्ता।

२०-०४-२०१९ टीचर्स्-युनिवर्सिटी गान्धिनगरे "बोर्ड ऑफ् स्टडीज्" उपवेशने भागं गृहीत्वा संस्कृतभाषा अनिवार्यरूपेण पाठ्यक्रमेषु भवेदिति स्वमतं प्राकाशयत्।

२३-०४-२०१९ राष्ट्रियसंस्कृतसंस्थानस्य मुम्बैस्थे क.ज. सोमैया परिसरे वार्षिकोत्सवे मुख्यातिथिरूपेण उपस्थितिः।

०१-०५-२०१९ विश्वविद्यालये ई-लाइब्रेरी निर्माणविषये जर्मनदेशस्थ-हैडल्बर्गविश्वविद्यालयेन सह विडिओ-कॉन्फ्रेसिंग् द्वारा वार्ता।

१७-०५-२०१९ मुजफ्फरनगरस्थ-बिहारविश्वविद्यालयस्य संस्कृतविभागे विद्यावारिधिच्छात्रस्य वाक्परीक्षा स्वीकृता।

१८-०५-२०१९ वाराणस्यां कबीरनगरे काशीविद्वत्परिषदा अभिनन्दितः।

२०-०५-२०१९ शिक्षणमन्त्रिणा माननीयेन श्रीभूपेन्द्रसिंहचूडासमामहोदयेन सह विश्वविद्यालयकार्यार्थं मेलनम्।

२१-०५-२०१९ जर्मनदेशस्थेन Leipzig विश्वविद्यालयेन सह अभिबन्धं (MoU) कर्तुं चर्चायाम् उपस्थितिः।

२५-०५-२०१९ राजकोटे संस्कृतकार्यकर्तृभिः सह मेलनम्।

२६-०५-२०१९ राजकोटे संस्कृतभारत्याः प्रबोधनवर्गे विभक्ति-कारकाणि अपाठयत्।

०५-०६-२०१९ श्रीसोमनाथन्यासेन आयोजिते Lifeline प्रियादत्तवृत्तवितरणसमारोहे उपस्थितिः।

०६-०६-२०१९ राज्यपालभवने शिक्षणमन्त्रि-प्रधानशिक्षणसचिवादिभिः सह उपवेशनम्।

०७-०६-२०१९ विश्वविद्यालयस्य कार्यकारिण्याः (Executive Council) गोष्ठ्याम् आध्यक्ष्यम् अवहत्।

०९-०६-२०१९ वाराणसीस्थेन इन्दिरागान्धि-राष्ट्रियकलाकेन्द्रेण आयोजितायां पाण्डुलिपिकार्यशालायाम् एकलपाण्डुलिपिसम्पादनविषये आमन्त्रित-व्याख्यानम् अकरोत्।

१० तः ११-०६-२०१९ वाराणसीस्थे इन्दिरागान्धि-राष्ट्रियकलाकेन्द्रे "कलातत्त्वकोषः" किञ्च आलेखनविषये प्रस्तुतिः।

२१-०६-२०१९ विश्वविद्यालये अन्ताराष्ट्रिययोगदिवसे उपस्थितो भूत्वा सर्वान् समबोधयत्।

२५-०६-२०१९ विश्वविद्यालयस्थप्राध्यापकानां शैक्षिकप्रोन्नतियोजनायाः (CAS) गोष्ठ्याम् उपस्थितिः।

०६-०७-२०१९ भारतीयसांस्कृतिसम्बद्धपरिषत्, नवदेहल्यां "विश्वसंस्कृतपुरस्कारः-२०१९" इत्यत्र निर्णायकसमितौ भागग्रहणम्।

१६-०७-२०१९ विश्वविद्यालयेन समायोजिते गुरुपूर्णिमाकार्यक्रमे उपस्थितिः।

२१-०७-२०१९ GCERT गान्धिनगरे गुजरातराज्यस्य माननीयमुख्यमन्त्रिणः आध्यक्ष्ये आयोजितायां गोष्ठ्याम् उपस्थितिः।

२२-०७-२०१९ हरियाणास्थ-महर्षिवाल्मीकिसंस्कृतविश्वविद्यालस्य शिक्षापरिषदः प्रथमगोष्ठ्याम् उपस्थितिः।

२३-०७-२०१९ नवदेहल्यां विश्वविद्यालयानुदानायोगेन संस्कृतस्य विकासाय आयोजितायां गोष्ठ्यां विषयविशेषज्ञरूपेण उपस्थितिः।

२६-०७-२०१९ संस्कृतभाषायाः विदुषां राष्ट्रपतिसम्माननार्थं किञ्च महर्षिबादरायणव्यासपुरस्कारार्थं चयनसमितौ उपस्थितिः।

०३-०८-२०१९ गुजरातविश्वविद्यालयेन आयोजिते "भविष्याय संस्कृतम्" इत्याख्ये एकदिवसीयसम्मेलने विशेषोपस्थितिः।

०६-०८-२०१९ गान्धिनगरे राजभवने माननीयराज्यपालस्य आध्यक्ष्ये आयोजितायां चर्चागोष्ठ्याम् उपस्थितिः।

०७-०८-२०१९ वेरावलस्थ-आदित्यबिरलापब्लिकविद्यालयस्य संस्कृतदिवसकार्यक्रमे मुख्यातिथिरूपेण उपस्थाय सर्वान् समबोधयत्।

०८-०८-२०१९ श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितस्य संस्कृतसप्ताहोत्सवस्य उद्घाटनकार्यक्रमे आध्यक्षीयभाषणेन सर्वान् समबोधयत्।

०८-०८-२०१९ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य विद्यापरिषदः (Academic Council) गोष्ठ्याः आध्यक्ष्यमकरोत्।

२७-०८-२०१९ भृगुकच्छस्थ-श्रीनर्मदासंस्कृतवेदपाठशालायां डॉ. पी.टी.दवे वर्यस्य सम्मानसमारोहे मुख्यातिथिरूपेण उपस्थितिः।

२८-०८-२०१९ काशीहिन्दूविश्वविद्यालये विभागीयशोधसमितौ निरीक्षकरूपेण उपस्थितिः।

२९-०८-२०१९ अगरतलास्थ-त्रिपुराविश्वविद्यालयस्य मेघाप्रोन्नतिसमितौ विषयविशेषज्ञरूपेण उपस्थितिः।

०९-०९-२०१९ श्रीसोमनाथसंस्कृतविश्वविद्यालये नूतनभवनद्वयस्य भूमिपूजनकार्यक्रमे उपस्थितिः।

१६-०९-२०१९ भारतविकासपरिषत्, वेरावलम् इति संस्थया आयोजिते प्रान्तीयगानस्पर्धायाः पुरस्कारवितरणसमारोहे मुख्यातिथिरूपेण उपस्थितिः।

२५ तः २७-०९-२०१९ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य "स्फुरणम्" इत्याख्ये त्रयोदशे युवमहोत्सवे उपस्थितिः किञ्च २७-०९-२०१९ तमे दिनाङ्के शिक्षणमन्त्रिणा माननीयभूपेन्द्रसिंहचूडासमामहोदयेन सह नूतनभवनद्वयस्य शिलान्यासकार्यक्रमे उपस्थितिः।

## नूतनप्रविष्टच्छात्राणां विषयचयनपरामर्शगोष्ठी



विषयचयनपरामर्शगोष्ठ्याम् उपस्थिताः प्राध्यापकाः

श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रतिवर्षमिव अस्मिन्नपि वर्षे सत्रारम्भे प्राचार्यस्य डॉ. नरेन्द्रकुमारपण्ड्यावर्यस्य प्रेरणया शास्त्रिप्रथमवर्षे नूतनप्रविष्टच्छात्राणां विषयचयनपरामर्शगोष्ठी समायोजिता। वर्षारम्भे नूतनाः छात्राः प्रथमे वर्षे यदा प्रविशन्ति तदा विश्वविद्यालये कियन्तो विषयाः अध्याप्यन्ते, कः अध्यापकः कं विषयं कया पद्धत्या पाठयति, कस्य विषयस्य पठनस्य को लाभः, कस्मिन् विषये के ग्रन्थाः समाविशन्ति इत्यादिकं सर्वं विवरणं ज्ञातुं छात्राः उत्सुकाः भवन्ति। अतः एतद्विषये तत्तद्विषयप्राध्यापकैः सर्वेभ्यः छात्रेभ्यः मार्गदर्शनं प्रदीयते। अनेन मार्गदर्शनेन मुख्यगौणविषयचयने छात्राणां सारल्यं भवति। किञ्च विषयचयने विश्वविद्यालयेन सञ्चालितायाः CBCS इति प्रक्रियायाः अपि ज्ञानं भवति। प्रतिवर्षमिव अस्मिन्नपि वर्षे सत्रस्य प्रारम्भे इयं विषयचयनपरामर्शगोष्ठी छात्रैः प्राध्यापकैश्च सम्भूय समायोजिता। अस्मिन्नवसरे प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या अत्यन्तसारल्यपूर्णेन मार्गदर्शनेन सर्वान् छात्रान् समबोधयत्।

## मादकपदार्थानां दुरुपयोगः किञ्च अनधिकृतपदार्थादानप्रदाननिरोधदिवसः समाचरितः



मादकपदार्थविषये व्याख्यानं विदधानः डॉ. वघासीयावर्यः



व्याख्यानकार्यक्रमे भाषमाणः कुलपतिः प्रो. गोपबन्धुमिश्रः

व्यसनयुक्तपदार्थानां दुरुपयोगः तथा च अनधिकृतरीत्या तादृशानां पदार्थानां व्यापारनिरोधो भवेदिति विषयमभिमुखीकृत्य अन्ताराष्ट्रियदिवसः समाचरितः २६-०६-२०१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे। एतदङ्गतया विषयेऽस्मिन् छात्रान् उन्मुखीकर्तुं माननीयकुलपतेः प्रो. गोपबन्धुमिश्रवर्यस्य मार्गदर्शने एकस्य व्याख्यानस्य आयोजनमभूत्। वेरावलस्थवैद्यकः डॉ. जयेशवघासीया एतद्विषये विशिष्टं व्याख्यानम् अकरोत्। स्वशक्त्यनुसारेण व्यसनमुक्त्यर्थं किं किं कर्तुं शक्यते इति विषये विविधान् उपायान् डॉ. वघासीयामहोदयः उपस्थितेभ्यः समबोधयत्। व्यसनकारकपदार्थानां भक्षणेन प्रतिदिनं सहस्रं जनाः मृत्युमुखाः भवन्ति। मादकपदार्थानां सेवनेन न केवलं स्वास्थ्यम् अपक्षीयते परं धनह्रासः, सामाजिकावनतिः, परिवारे कलहसाम्राज्यादिदोषाः समुद्भूताः भवन्ति। अस्मिन् कार्यक्रमे उपस्थितैः सर्वैः छात्रैः अध्यापकैश्च व्यसनमुक्त्यर्थं प्रतिज्ञा कृता।

प्रसङ्गेऽस्मिन् कुलपतिवर्यः प्रो. गोपबन्धुमिश्रः अपि उपस्थितान् सर्वान् स्ववचोभिः समबोधयत्। कुलपतिना भणितं यत् मादकपदार्थानां सेवनेन न केवलं शरीरहानिर्जायते परं धनहानिः, स्वास्थ्यहानिः, सामाजिकहानिरपि भवति। अस्मिन्नवसरे प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या, सर्वे प्राध्यापकाः, छात्राश्च समुपातिष्ठन्। डॉ. जयेश मुङ्गरा अस्य कार्यक्रमस्य संयोजनम् अकरोत् किञ्च पुराणसङ्कायाध्यक्षः डॉ. पङ्कजकुमाररावलः कार्यक्रमस्य सञ्चालनम् अकार्षीत्।

## ग्रन्थालयेन अभिमुखीकरणकार्यक्रमः समायोजितः



१२-०७-२०१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य ग्रन्थालयपक्षतः विश्वविद्यालयस्य सभाखण्डे विश्वविद्यालये पठतां छात्राणां कृते ग्रन्थालय-अभिमुखीकरणकार्यक्रमः समायोजितः आसीत्। अस्मिन् कार्यक्रमे ग्रन्थपालेन श्रीरवीन्द्रकालेमहोदयेन विश्वविद्यालयस्य अन्तर्जाले ग्रन्थालयस्य जालपुटं प्रदर्श्य ग्रन्थालये छात्रसौविध्यम्, ग्रन्थालयस्थं पुस्तकविवरणम्, ग्रन्थालयनियमाः, त्रिवेणीसन्दर्भपुस्तकालयः इत्यादिविषयेषु छात्रोपयोगिमार्गदर्शनमकारि।

## गुरुपूर्णिमामहोत्सवः समाचरितः विश्वविद्यालये

१६- ०७- २०१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे व्यासपूर्णिमा इत्यभिधेयां गुरुपूर्णिमाम् अभिलक्ष्य गुरूणां पूजनं समयोजितम्। अष्टादशपुराणानां कर्तुः सत्यवतीसुतस्य पूजनस्य आयोजनं डॉ. पङ्कजकुमाररावलवर्येण किञ्च इतरैः अध्यापकैः छात्रैश्च विधिपूर्वकम् अक्रियत। अस्मिन्नवसरे भगवतः बादरायणस्य पूजनार्थं विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चना दुबे, प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या अन्ये च अध्यापकाः कर्मचारिणः, छात्राश्च उपास्थिताः आसन्।



व्यासपूजनरतः माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः

अस्मिन् पूजनकार्यक्रमे आचार्यत्वेन सोमनाथस्थः कर्मकाण्डविद्वान् वेदज्ञश्च श्रीपरागभाईपाठकः विशेषरूपेण समुपातिष्ठत्। तेन विश्वविद्यालयच्छात्रसाहाय्येन विविधोपचारैः विविधमन्त्रैश्च सत्यवतीसुतस्य पूजनं सम्पादितम्। तदनु कुलक्रमानुगुणं छात्रैः सम्भूय प्रभासज्योतिः इति शैक्षणिक-भवनस्य सभाखण्डे गुरुपूजाङ्गतया यथोपचारं यथाशक्ति समेषां गुरूणां पूजनं समक्रियत। अस्मिन्नवसरे केचन छात्राः स्वान्तकरणैः गुरून् प्रति आदरभावो प्रकटीकृत्य गुरुगाथा वर्णिता। तत्पश्चात् गुरुभिरपि स्ववचोभिः छात्रकल्याणाय मार्गदर्शनं प्रदत्तम्।





गुरुपूजनकार्यक्रमे सांस्कृतिककार्यक्रमप्रस्तुतिः उपस्थिताश्च छात्राध्यापकाः

## "आधुनिकयुगे संस्कृतं तस्य आवश्यकता च" - एकदिवसीया राज्यस्तरीया संस्कृतसङ्गोष्ठी



संस्कृतसङ्गोष्ठ्यां कुलपतेः प्रो. गोपबन्धुमिश्रस्य स्वागतं कुर्वन् संस्कृतप्राध्यापकः श्रीअरविन्दनन्दाणियावर्यः

श्रीसोमनाथसंस्कृतविश्वविद्यालयः संस्कृतस्य संस्कृतेश्च प्रचाराय प्रसाराय च कृतनिश्चयोऽस्ति। अस्मिन्नेव सन्दर्भे १४-०८-२०१९ दिनाङ्के 'आधुनिकयुगे संस्कृतं तस्यावश्यकता च' इति विषये गुजरातराज्ये विभिन्नेषु कलामहाविद्यालयेषु संस्कृतम् अध्यापयतां प्राध्यापकानां काचित् राज्यस्तरीया संस्कृतसङ्गोष्ठी संस्कृतसप्ताहोत्सवस्य अङ्गतया समायोजिता आसीत्। अस्याः सङ्गोष्ठ्याः उद्घाटनं माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः अकरोत्। प्राचार्या रश्मिबेनमहेता अतिथिविशेषपदं व्यभूषयत्। विश्वविद्यालयस्य कुलसचिवः डॉ. दशरथजादवः विशेषरूपेण उपस्थाय मार्गदर्शनमकार्षीत्। उद्घाटनसत्रे अध्यक्षपदेन वदता कुलपतिना उक्तं यत् अयं विश्वविद्यालयः समग्रगुजरातराज्यस्थसंस्कृताध्यापकानां शिक्षणकेन्द्रं स्यात् तदर्थं विश्वविद्यालयेन विविधाः प्रकल्पाः अनुष्ठीयन्ते। गुजरातराज्यस्य अधिकाधिकाः छात्राः संस्कृतं पठेयुः, संस्कृतं पठित्वा योग्याः नागरिकाः भवेयुः एतद्विषये अयं विश्वविद्यालयः निरन्तरं प्रयतमानोऽस्ति। अस्यां सङ्गोष्ठ्यां विविधमहाविद्यालयेभ्यः आगताः संस्कृताध्यापकाः विभिन्नसत्रेषु सोत्साहं भागं गृहीत्वा चर्चागोष्ठ्यां स्वविचारान् अपि प्रकटितवन्तः।



विश्वविद्यालये प्रचलितपाठ्यक्रमान् विज्ञापयन् डॉ. मोकरियावर्यः

अस्याः सङ्गोष्ठ्याः समापनसत्रे भक्तकविनरसिंहमहेताविश्वविद्यालयस्य कुलपतिः प्रो. चेतनत्रिवेदी मुख्यातिथिरूपेण उपस्थाय सर्वान् स्वभाषणेन विशेषमार्गदर्शनेन च समबोधयत्। तेनोक्तं यत् वर्तमानकाले जनाः आङ्ग्लं प्रति धावन्तः सन्ति परं आङ्ग्लापेक्षया संस्कृताध्ययनम् अत्यन्तं सरलमस्ति। साम्प्रतं संस्कृतम् अधीत्य आजीविकाप्राप्त्यर्थम् अधिकः अवसरः अस्ति। अस्मिन्नवसरे सङ्गोष्ठीविषये जोषीपुरामहिलाआर्ट्स-कॉमर्समहाविद्यालयस्य प्राध्यापिका डॉ. भावनाबेनगजेरा स्वप्रतिभावं प्राकटयत्। विश्वविद्यालयस्य साहित्यप्राध्यापकः डॉ. डी. एम्. मोकरिया महोदयः अस्याः सङ्गोष्ठ्याः संयोजकत्वम् अवहत्।

## ७३ तमं स्वातन्त्र्यपर्व समाचरितं श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे




स्वातन्त्र्यपर्वणि उद्बोधनं विदधानः कुलपतिः प्रो. गोपबन्धुमिश्रः



कार्यक्रमे उपस्थिताः अध्यापकाः छात्राश्च

प्रतिवर्षमिव ऐषमः श्रीसोमनाथसंस्कृत-विश्वविद्यालयेन १५ ऑगस्त २०१९ दिनाङ्के स्वतन्त्रतादिवसस्य भव्यतया आयोजनम् अक्रियत। विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः ध्वजोत्तोलनम् अकरोत् तदनु सर्वैः मिलित्वा राष्ट्रगानमगीयत। प्रसङ्गेऽस्मिन् स्वीयोद्बोधने प्रो. गोपबन्धुमिश्रवर्यः अवादीत् यत् अस्मिन् वर्षे स्वातन्त्र्यपर्वणः एतद्वैषिष्ट्यमस्ति यत् अस्माकं राष्ट्रं भारतस्य अखण्डताविषये एकीभूय समागतमस्ति। भारतस्य अखण्डतारक्षणे "एकं राष्ट्रम् एकं संविधानम्" इति लक्ष्यमुररीकृत्य जम्मूकाश्मीरराज्यात् धारा ३७० किञ्च ३५A इत्यस्य अपसारणार्थं माननीयप्रधानमन्त्रिणः श्रीनरेन्द्रमोदिवर्यस्य सर्वकारः भूयो भूयः अभिनन्द्यते। अस्माकं पूर्वजैः हुतात्मभिश्च भारतस्य स्वातन्त्र्यं तु अवाप्तम्, परमिदानीम् एतस्य स्वातन्त्र्यस्य रक्षणस्य दायित्वम् अस्माकं वर्तते। अस्माभिः स्वकर्तव्यपालनपूर्वकं राष्ट्रभक्तिः प्रदर्शनीया। इयं राष्ट्रभक्तिः अस्माभिः अनुशासनपालनेन, स्वकर्तव्यपालनेन, जलसञ्चयेन, विद्युत्संरक्षणेन इत्यादिभिः नानाभिः उपायैः कर्तुं शक्यते।

अस्मिन् स्वातन्त्र्यदिवससमाचरणकार्यक्रमे विश्वविद्यालयस्य छात्रैः देशभक्तिगीतानि, देशभक्तिभाषणानि, देशभक्तिकाव्यानि च मनोहारिरीत्या प्रस्तुतानि। अस्मिन् कार्यक्रमे कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चनाकुमारीदुबे, प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या, वेदविभागाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, अन्ये सहायकाचार्याः, शिक्षणेतराधिकारिणः कर्मचारिणः, छात्राश्च समुपातिष्ठन्। अस्य कार्यक्रमस्य मार्गदर्शनं डॉ. नरेन्द्रकुमारपण्ड्या किञ्च मञ्चसञ्चालनं डॉ जयेशमुङ्गरा अकरोत्।



७३तमस्य स्वातन्त्र्यपर्वणः किञ्चन दृश्यम्

## छात्राणां मुख्यमन्त्रिणः कार्यक्रमे उपस्थितिः

विद्यावारिधौ प्राप्तप्रवेशकैः विद्यार्थिभिः गुणवत्तायुक्तं संशोधनं क्रियेत तदर्थं गुजरातसर्वकारेण ०८-०८-२०१९ दिनाङ्के माननीयमुख्यमन्त्रिणः श्रीमतः विजयरूपाणीवर्यस्य आध्यक्ष्ये गान्धिनगरे "मुख्यमन्त्रि-संशोधन-प्रोत्साहन-योजना" इत्याख्यः कश्चन कार्यक्रमः समायोजितः। मुख्यमन्त्रिणः अस्यां प्रोत्साहनयोजनायां गुजरातसर्वकारः गुणवत्तापूर्णविद्यावारिधि-कुर्वद्भ्यः धनराशिं प्रदास्यतीति माननीयमुख्यमन्त्रिणा समुद्घोषणा अक्रियत। अस्य कार्यक्रमस्य उद्घाटनप्रसङ्गे श्रीसोमनाथसंस्कृतविश्वविद्यालस्य एकत्रिंशत् छात्राः नवदश छात्र्यश्च प्रो. विनोदकुमारझा किञ्च प्रो. महेन्द्रकुमारदवे इत्यनयोः प्राध्यापकयोः मार्गदर्शने गान्धिनगरं गत्वा भागमग्रहीषुः।



## आङ्ग्लसम्भाषणकार्यशाला

श्रीसोमनाथसंस्कृतविश्वविद्यालयः छात्राणां विविधप्रकारककौशल्य-वर्धनाय निरन्तरं प्रयत्नं कुर्वन्नस्ति। "पूर्णता गौरवाय" इति विश्वविद्यालयस्य ध्येयवाक्यं यथा सार्थकं सफलञ्च भवेत् तदर्थं छात्राणां सूक्ष्मकौशल-विकासाय सर्वाः कौशलवर्धकाः प्रवृत्तयः विश्वविद्यालयेन अनुष्ठीयन्ते।

अस्मिन्नेव क्रमे विश्वविद्यालयपरिसरे पठतां छात्राणाम् आङ्ग्ल-भाषायामपि लेखनस्य सम्भाषणस्य च नैपुण्यं भवेदिति धिया २७-०७-२०१९ दिनाङ्कतः एका कार्यशाला विश्वविद्यालयपरिसरे समायोजिता आसीत्। अस्यां कार्यशालायाम् आङ्ग्लभाषाविद्वान् प्राध्यापकः डॉ. नीलेशजोषी छात्रेभ्यः आङ्ग्लभाषासम्भाषणविषये प्रात्यक्षिकं मार्गदर्शनम् अकरोत्। विश्वविद्यालयस्य अन्तेवासिनः प्रतिदिनं सायङ्काले एकघण्टां यावत् अस्यां कार्यशालायां भागवाक्षु। अस्यां कार्यशालायां छात्रेभ्यः सम्भाषणपूर्वकम् आङ्ग्लव्याकरण प्रात्यक्षिकं ज्ञानं प्रदत्तम्। किञ्च विश्वविद्यालये शास्त्रिस्तरे अनिवार्यरूपेणापि आङ्ग्लविषयः वर्तते तद्विषयेऽपि सुष्ठु पाठितम्। अस्याः कार्यशालायाः संयोजकरूपेण डॉ. डी. एम. मोकरिया किञ्च सहायकरूपेण डॉ. दीपेशकतिरा, डॉ. योगेशपटेलश्च कार्यम् अकुरुताम्।

## साहित्यशास्त्रे विशिष्टव्याख्यानम्



साहित्यशास्त्रे विशिष्टव्याख्यानं विदधानः प्रो. रहसविहारीद्विवेदी

श्रीसोमनाथसंस्कृतविश्वविद्यालयः काले काले विविधविधाशाखासु पण्डितमण्डितविदुषां विशिष्टव्याख्यानि आयोजयति। अस्मिन् क्रमे २१-०९-२०१९ तमे दिनाङ्के साहित्यसङ्कायेन जबलपुरस्थ-राणीदुर्गावती-विश्वविद्यालयस्य प्राप्तावकाशप्राध्यापकस्य प्रो. रहसविहारीद्विवेदिवर्यस्य साहित्यशास्त्रे विशिष्टं व्याख्यानं समायोजि। संशोधनकार्यं कथं सम्पादनीयमित्यस्मिन् विषयेऽपि बोधदायकं शोधदृष्टिप्रदञ्च व्याख्यानं प्रो. द्विवेदिवर्येण प्रदत्तम्। अस्मिन् विशिष्टव्याख्याने साहित्यविभागस्य प्राध्यापकाः अन्तेवासिनश्च सार्धहोराद्वयव्यापिविशिष्टव्याख्यानम् अश्रौषुः। नैकोदाहरणपुरःसरं स्वकीयविशिष्टशैल्या प्रो. रहसविहारिद्विवेदिवर्यः सर्वान् समबोधयत्। अस्मिन् प्रसङ्गे माननीयकुलपतेः प्रो. गोपबन्धुमिश्रवर्यस्यापि प्रेरकोपस्थितिः आसीत्। अस्य विशिष्टव्याख्यानस्य सञ्चालनं प्रो. महेन्द्रकुमारदवे अकरोत्।

## डॉ. दशरथजादवः कुलसचिवरूपेण नियुक्तः



डॉ. दशरथजादववर्यस्य पदभारग्रहणविधौ उपस्थिताः प्राध्यापकाः कर्मचारिणश्च

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य स्थायिकुलसचिवरूपेण डॉ. दशरथजादवमहोदयस्य नियुक्तिः गुजरातसर्वकारेण कृता। डॉ. जादववर्येण २५-०७-२०१९ दिनाङ्के स्वीयः कार्यभारः स्वीकृतः। अस्मिन्नवसरे विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चनादुबे, प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या, वेदविभागाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, परीक्षानियामकः डॉ. योगेशपटेलः, अन्ये आचार्याः, उपाचार्याः, सहायकाचार्याः, शिक्षणेतराधिकारिणः, कर्मचारिणश्च समुपस्थाय डॉ. जादववर्याय अभिनन्दनवचांसि अपाठयन्। कुलसचिव-कार्यालये डॉ. जादवस्य पदग्रहणविधौ छात्रैः वेदमन्त्रोच्चारणम् अक्रियत। कुलसचिवेन स्वीयपदस्य ग्रहणविधिः संस्कृतभाषया समनुष्ठितः इतीयान् अत्र विशेषः। पदग्रहणानन्तरं डॉ. जादववर्यः अब्रवीत् यत् सर्वेषां सहयोगेन अयं विश्वविद्यालयः 'पूर्णता गौरवाय' इति स्वलक्ष्यं प्रति यथा गच्छेत् तथाविधप्रयासान् अहं सर्वेषां सहयोगेन करिष्यामि। डॉ. दशरथजादव-महोदयस्य अयं कार्यकालः पञ्चवर्षात्मको भविष्यति।

## "अलङ्कारनिर्णयः" इति विषये समायोजिता साहित्यशास्त्रीया कार्यशाला

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २६-०८-२०१९ तः ३०-०८-२०१९ पर्यन्तं पञ्चदिवसीया साहित्यशास्त्रीया "अलङ्कारनिर्णयः" इति विषये कार्यशाला समायोजिता आसीत्। अस्यां कार्यशालायां विश्वविद्यालयपरिसरच्छात्रैः सह विविधमहाविद्यालयेभ्यः आगताः उपपञ्चविंशतिः छात्राः भागं गृहीतवन्तः। अस्याः कार्यशालायाः उद्घाटनं माननीयकुलपतेः प्रो. गोपबन्धुमिश्रवर्यस्य किञ्च कुलसचिवस्य डॉ. दशरथजादवस्य आध्यक्ष्ये सम्पन्नम्। उद्घाटनसमापनकार्यक्रमे विश्वविद्यालयस्य आचार्याः, उपाचार्याः सहायकाचार्याः छात्राश्च सहभागिनोऽभवन्। कार्यशालायाः उद्घाटनसत्रे माननीयकुलपतिना उक्तं यत् यथा अलङ्काराः शरीरस्य शोभां वर्धयन्ति तथैव साहित्यग्रन्थेषु काव्येष्वपि अलङ्काराः काव्यचमत्कृतिं जनयन्ति। कार्यशालायामस्यां विभिन्नालङ्कारिकग्रन्थैः उदाहरणपुरस्सरं सरलरीत्या सुबोधरीत्या च अलङ्कारपाठनम् अक्रियत। अस्यां प्रि.डॉ. नरेन्द्रकुमार पण्ड्या, प्रो. अर्चनाकुमारीदुबे, प्रि. डॉ. अमृतलाल भोगायता, डॉ. कलिदासठाकरश्च व्याख्यानानि प्रदत्तवन्तः। अस्याः कार्यशालायाः संयोजनं प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या अकरोत्।



अलङ्कारनिर्णयः इति कार्यशालायाः समारोपसमारोहे प्रतिभागिभिः सह प्राध्यापकाः

# "संस्कृतसाहित्ये वागर्थविचारः" इति विषये सम्पन्ना राष्ट्रिया सङ्गोष्ठी

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य साहित्यसङ्कायेन १९-२० सितम्बर् २०१९ दिनाङ्कयोः विश्वविद्यालयपरिसरे "संस्कृतसाहित्ये वागर्थविचारः" इति विषयमादाय एका अखिलभारतीयसाहित्यशास्त्रीया सङ्गोष्ठी समायोजिता। नैकविद्वज्जनसमन्वितायाम् अस्यां सङ्गोष्ठ्याम् प्राध्यापकानाम् अष्टाविंशतिः शोधपत्रवाचनमकरोत् किञ्च विविधेभ्यः विश्वविद्यालयेभ्यः महाविद्यालयेभ्यश्च समागताः पञ्चाशीत्यधिकाः प्राध्यापकाः शोधच्छात्राश्च प्रतिभागिरूपेण भागमग्रहीषुः। अस्याः सङ्गोष्ठ्यां संयोजकः साहित्यसङ्कायाध्यक्षः प्रो. महेन्द्रकुमार दवे आसीत्।



उद्घाटनसत्रस्य किञ्चन दृश्यम्

अस्याः सङ्गोष्ठ्याः उद्घाटनसत्रं १९-०९-२०१९ दिनाङ्के पूर्वाह्णे एकादशवादने समवर्तत। सङ्गोष्ठ्या उद्घाटकरूपेण गुजरात-साहित्य-अकादम्याः अध्यक्षः पद्मश्रीः डॉ. विष्णुपण्डया महोदयः विशेषरूपेण उपस्थितः आसीत्। तेन स्ववक्तव्ये उक्तं यत् अयं विश्वविद्यालयः संस्कृतक्षेत्रे उत्तमं कार्यं विदधानो वर्तते, अतः अयं विश्वविद्यालयः गुजरातस्य प्राचीनवल्लभीविद्यापीठसदृशां ख्यातिं प्राप्नुयात्। उपस्थितान् छात्रान् अभिलक्ष्य तेनोभाणि यत् विद्यार्थिजीवने स-चतुष्टयम् अनुकरणीयं वर्तते। एतेन सङ्घर्ष-सङ्कल्प-सामर्थ्य-सृजनाख्यसचतुष्टयेन जीवने अवश्यं साफल्यं प्राप्यते। पद्मश्रीः पण्ड्यावर्यः गुजरात-साहित्य-अकादमीपक्षतः प्रकाशितानाम् अप्रकाशितपाण्डुलिपिग्रन्थानां विषयेऽपि चर्चामकरोत्। उद्घाटनसत्रे सारस्वतातिथिरूपेण वदता जबलपुरस्थराणीदुर्गावतीविश्वविद्यालयस्य प्रास्ताविकाशेन प्राध्यापकेन आचार्येण रहसविहारिद्विवेदिना विस्तृतरूपेण समीक्षापुरःसरं संस्कृतसाहित्यस्य परिचयः उपस्थापितः। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः उद्घाटनसत्रे स्वकीयाध्यक्षीयभाषणेन सर्वान् समबोधयत्।



सम्मेलने उपस्थिताः महानुभावाः प्रतिभागिनः, छात्राश्च

दिवसद्वयव्यापिन्याः अस्याः सङ्गोष्ठ्याः अङ्गतया १९-०९-२०१९ दिनाङ्के सायङ्काले कविसमवायः समायोजितः। प्रो. शिवरामशर्मा, डॉ. बलराम शुक्लः, डॉ. नरेन्द्रकुमार पण्ड्या, डॉ. अमृतलाल भोगायता, डॉ. कालिदास ठाकरः, प्रो. रहसविहारी द्विवेदी, प्रो. मनुलता, डॉ. रवीन्द्र खाण्डवाला, डॉ. भरत बी. परमार इत्यादिभिः कविभिः साहित्यरसगुम्फिताः स्वकीयरचनाः प्रस्तुताः। अस्मिन् कविसम्मेलने माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः अपि स्वकाव्यपाठेन उपस्थितान् सर्वान् अतोषयत्। कविसम्मेलनस्य मञ्चसञ्चालनं गुजरातराज्यस्य सुप्रसिद्धः रससिद्धः कविवरः डॉ. अमृतलालभोगायता अत्यन्तं लालित्यपूर्णशैल्या अकरोत्।




समापनकार्यक्रमस्य दृश्यमेकम्



कविसम्मेलनस्य दृश्यमेकम्

२०-०९-२०१९ दिनाङ्के अपराह्णे सार्धत्रिवादने अस्याः सङ्गोष्ठ्याः सम्पूर्तिकार्यक्रमः समायोजितः, यत्र काशीहिन्दूविश्वविद्यालयस्य साहित्यविद्या-धर्मविज्ञानसङ्कायस्य साहित्यविभागे प्रो. शिवरामशर्मा सारस्वतातिथिरूपेण उपस्थाय कुञ्चिकाभाषणम् अकरोत्। सुधिभिः प्रशंसिते स्वकीयोद्बोधने तेन संस्कृतसाहित्ये वागर्थविचारविषये विभिन्नाचार्याणां मतानि उद्धृतानि। कुलपतिः प्रो. गोपबन्धुमिश्रः अस्मिन् सम्पूर्तिसत्रेऽपि स्वकीयाध्यक्षीयोद्बोधनेन सर्वान् प्राचूचुदत्। कार्यक्रमान्ते साहित्यसङ्कायाध्यक्षः किञ्च अस्याः सङ्गोष्ठ्याः संयोजकः प्रो. महेन्द्रकुमारदवे आभारविधिं प्राकाशयत्। अस्मिन् सम्पूर्तिसत्रे मञ्चसञ्चालनं दर्शनविभागप्राध्यापकः डॉ. जानकीशरण आचार्यः अकरोत्।

## "संस्कृतवाङ्मये गोतत्त्वविमर्शः" विषये व्याख्यानम्




संस्कृतवाङ्मये गोतत्त्वं विमर्शयन् डॉ. कथिरियावर्यः



व्याख्यानसत्रे उपस्थिताः प्राध्यापकाः छात्राश्च

२७-९-२०१९ दिनाङ्के भारतसर्वकारस्य राष्ट्रिय-कामधेनु-आयोगस्य अध्यक्षः डॉ. वल्लभभाईकथिरियावर्यः "संस्कृतवाङ्मये गोतत्त्वविमर्शः" इति विषयमादाय विश्वविद्यालय-परिसरे व्याख्यानमेकं प्रादात्। अस्मिन्नवसरे कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चनादुबे, प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या, अन्ये च शिक्षकाः, कर्मचारिणः छात्राश्च समुपातिष्ठन्। डॉ. कथिरियावर्येण भारतसर्वकारेण किञ्च राष्ट्रिय-कामधेनु-आयोगेन क्रियमाणानां कार्याणां सम्यग्विवरणं प्रदाय गोमहिमविषये सुष्ठु भणितम्। "अयं विश्वविद्यालयः न केवलं संस्कृताध्यापने एव तत्परो विद्यते परं संस्कृतिरक्षणेऽपि कृतसङ्कल्पो दृश्यते" इति डॉ. कथिरियामहोदयः अब्रवीत्। स्वव्याख्यानेन सह डॉ. कथिरियामहोदयः भारतसर्वकारेण गोसेवाविषये गोसंवर्धनविषये च क्रियमाणान् बहुविधप्रकल्पान् व्यज्ञापयत्। अस्मिन्नवसरे डॉ. नरेन्द्रकुमार पण्ड्या, डॉ. पङ्कजकुमार रावलः, डॉ. शत्रुघ्न पाणिग्राही च संस्कृतवाङ्मये गोतत्त्वविषये उद्बोधनम् अकार्षुः। आभारविधिज्ञापनकाले कुलसचिवः डॉ. दशरथजादवः राष्ट्रिय-कामधेनु-आयोगस्य संशोधनकेन्द्रमेकं श्रीसोमनाथसंस्कृत-विश्वविद्यालयपरिसरेऽपि भवेत् इति डॉ. कथिरियावर्याय न्यवेदयत्।

## चन्द्रमौलिच्छात्रावासे समायोजितः गणेशोत्सवः



विघ्नहर्तुः श्रीगणेशस्य पूजायां कुलपतिवर्यः छात्राश्च

"उत्सवप्रियाः खलु मानवाः" इति कविकुलगुरुकालिदासस्य वचनानुगुणं श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे चन्द्रमौलिच्छात्रावासे सितम्बरमासस्य २ तः ६ दिनाङ्कपर्यन्तं छात्रैः छात्राभिश्च पञ्चदिनात्मकः गणेशोत्सवः समायोजितः आसीत्। तेषु दिवसेषु विश्वविद्यालयस्य सर्वाङ्गीणविकासाय भगवतः विघ्नहर्तुः विनायकस्य विविधोपचारैः पृथक्-पृथग्वेदमन्त्रैश्च छात्रावासस्य गृहपतिना भाविनपण्ड्यामहोदयेन तथा च वेदज्ञैः छात्रैः पूजनं कारितं कृतञ्च। प्रथमेऽहनि भगवतः प्रतिष्ठार्थं पूजनार्थं च विश्वविद्यालयस्य मान्यः कुलपतिः प्रो. गोपबन्धुमिश्रः समुपातिष्ठत्। मध्यदिवसे गौरीनन्दनस्य अन्नकूटस्याप्यायोजनं कृतमासीत्। पूजनोत्तरे काले प्रतिदिवसं विश्वविद्यालयस्य समेषां छात्राणाम्, अध्यापकानां, कर्मचारिणां च कल्याणाय छात्रैः गणपत्यथर्वशीर्षस्तोत्रानुष्ठानं विहितम्। अन्ते कुलक्रमानुगुणं नादपुरस्सरं जयघोषपुरस्सरम् आनन्दप्रमोदेन सह छात्राः चन्द्रमौलिच्छात्रावासतः समुद्रं यावत् शोभायात्रारूपेण उत्सवं विधाय भगवतः गणेशस्य विसर्जनं कृतवन्तः।

## डिप्लोमापाठ्यक्रमप्रवेशविषये एकदिवसीयकार्यशाला




कार्यशालायाम् उपस्थितान् सम्बोधयन् परीक्षानियामकः डॉ योगेशपटेल

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे ०८-०८-२०१९ दिनाङ्के विश्वविद्यालयसंलग्नेषु पञ्चत्रिंशत् पदविकाभ्यासक्रमकेन्द्रेषु सञ्चालितानां विविधपदविकाभ्यासक्रमाणाम् २०१९-२० शैक्षणिकवर्षात् अधितन्त्रिप्रवेश-प्रक्रियां कर्तुम् एकदिवसीया कार्यशाला समायोजिता। कार्यशालायाः आरम्भे कुलपतिः प्रो. गोपबन्धुमिश्रः संस्कृतभाषायाः विकासार्थं किञ्च गुणवत्तायुक्तशिक्षणार्थम् उपस्थितान् सर्वान् समबोधयत्। कुलसचिवः डॉ. दशरथजादवः पदविकाभ्यासक्रमसम्बन्धितं प्राशासनिकं मार्गदर्शनम् अकरोत्। इन्फिनिटि- इन्फोवे इत्याख्यतन्त्रांशनिर्माणसंस्थया एतदनुगुणं तन्त्रांशं निर्माय कार्यशालायां समुपस्थितेभ्यः प्रतिभागिभ्यः अस्य तन्त्रांशस्य प्रदर्शनमपि कृत्वा विभिन्नप्रतिभागिकृतपृच्छायाः समाधानमपि व्यधायि। अस्यां कार्यशालायां त्रिंशदधिकाः संयोजकाः भागमग्रहीषुः। कार्यशालायाः सञ्चालनं किञ्च सम्पूर्तौ आभारविधिज्ञापनं परीक्षानियामकः डॉ. योगेशपटेलः अकरोत्। परीक्षाविभागस्य कर्मचारिणः कार्यशालायाः सफलतायै सम्यग्रूपेण स्वदायित्वं निरवाक्षुः।

## "गार्गीमहिलाछात्रावास-पातञ्जलयोगभवन" इति भवनद्वयस्य भूमिपूजनकार्यक्रमः



भूमिपूजनकार्यक्रमस्य किञ्चन दृश्यम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ९-९-२०१९ दिनाङ्के तदनुसारं भाद्रपदमासस्य शुभे शुक्लपक्षे एकादश्यां तिथौ "गार्गीमहिलाछात्रावास-पातञ्जलयोगभवन" इति भवनद्वयस्य निर्माणार्थं भूमिपूजनकार्यक्रमः समायोजितः। अस्मिन् भूमिपूजनविधौ असारवास्थ-नीलकण्ठसंस्कृतमहाविद्यालस्य प्राचार्यचरः डॉ. राजेन्द्रप्रसादशुक्लः आचार्यत्वेन समुपस्थाय भूमिपूजनकर्म अकारयत्। विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः, कुलसचिवः डॉ. दशरथजादवः, वेदसङ्कायाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, अनुस्नातक-विभागाध्यक्षा प्रो. अर्चनाकुमारीदुबे, प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या, प्रो. विनोदकुमार झा, इतरे अध्यापकाः शिक्षणेतरकर्मचारिणः, छात्राश्च समुपातिष्ठन्।

## थैलेसेमिया-परीक्षणशिबिरं समायोजितं विश्वविद्यालयपरिसरे

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अनुस्नातकविभागेन विश्वविद्यालय-सञ्चालितसंस्कृतमहाविद्यालयेन च राष्ट्रियसेवायोजनापक्षतः १३-०९-२०१९ दिनाङ्के अपराह्णे द्विवादनात् चतुर्वादनं यावत् थैलेसेमिया-परीक्षणस्य शिबिरं विश्वविद्यालयपरिसरे समायोजितम्। अस्मिन् शिबिरे इण्डियन्-रेड्क्रॉस्-सोसायटी गीरसोमनाथजनपदस्य अध्यक्षः श्रीकिरीट उनडकटः किञ्च सेवारामः, अमितश्रीवास्तवः इत्यादिमहानुभावैः स्वीयदलेन सह थैलेसेमियाविषये उपस्थित-च्छात्रेभ्यः सरलरीत्या विवरणं प्रदाय मार्गदर्शनमकारि। शिबिरे अस्मिन् ४८ बालकानां १० बालिकानाञ्च रक्तसर्वेक्षणं व्यधायि। अस्य थैलेसेमिया-परीक्षणशिबिरस्य समग्रसंयोजनं राष्ट्रियसेवायोजनासमन्वयकः डॉ. जयेशमुङ्गरा अकरोत्।




शिबिरस्य किञ्चन दृश्यम्

## विश्वविद्यालये समनुष्ठिताः वृक्षारोपणकार्यक्रमाः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन काले काले विश्वविद्यालयपरिसरे वृक्षारोपणकार्यक्रमाः समायोज्यन्ते। विश्वविद्यालयपरिसरस्य सौन्दर्य-वर्धनाय हरितक्षेत्रवर्धनाय च जुलैमासे नवदशे, ऑगस्ट् मासे चतुर्थे सप्तमे च दिनाङ्के वृक्षारोपणकार्यक्रमाः समायोजिताः। एतेषु कार्यक्रमेषु विश्वविद्यालयस्य अधिकारिणः कर्मचारिणः विशिष्य छात्राः सोत्साहं भागं गृहीत्वा अश्वत्थनीम्बवटवृक्षादीनां रोपणम् अकार्षुः। एतेषु वृक्षारोपण-कार्यक्रमेषु राष्ट्रियसेवायोजनासमन्वयकस्य डॉ. जयेशमुङ्गरावर्यस्य तथा च राष्ट्रियसेवायोजनाछात्राणां योगदानं श्लाघ्यमासीत्।





## डॉ. नरेन्द्रपण्ड्यावर्यः गुजरात-साहित्य-अकादमीद्वारा "शास्त्रपण्डितः" इति सम्मानेन पुरस्कृतः



राज्यपालवर्येण डॉ. पण्ड्यावर्यस्य सम्माननम्

गुजरातराज्यसर्वकारस्य संस्कृतसाहित्याकादमीद्वारा ३-७-२०१९ दिनाङ्के कर्णावत्यां गुजरात-विश्वविद्यालयस्य सेनेटहॉलसभाखण्डे २०१९ वर्षस्य शास्त्रपण्डितसम्मानपुरस्कारः श्रीसोमनाथ-संस्कृतविश्वविद्यालयसञ्चालितसंस्कृतमहाविद्यालयस्य प्राचार्याय डॉ. नरेन्द्रकुमारलालजीभाईपण्ड्या-वर्याय गुजरातराज्यस्य महामहिमराज्यपालस्य श्रीओ.पी. कोहलीमहोदयस्य करकमलाभ्यां समर्पितः। अस्मिन्नवसरे विविधविश्वविद्यालयानां कुलपतयः, गुजरातसाहित्य-अकादम्याः अध्यक्षः, महामात्रः, संस्कृतभारत्याः प्रान्तसङ्घटनमन्त्री, संस्कृतभारत्याः गुजरातप्रान्ताध्यक्षः, कार्यकर्तारः, आचार्याः, विद्वांसः, संस्कृतानुरागिणश्च समुपस्थिताः आसन्। ०५.०७.२०१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरेऽपि डॉ. पण्ड्यावर्यस्य सम्माननकार्यक्रमः कुलपतेः प्रो. गोपबन्धुमिश्रस्य आध्यक्ष्ये समायोजितः आसीत्।



विश्वविद्यालये डॉ. पण्ड्यावर्येण सह मान्यः कुलपतिः प्रो. गोपबन्धुमिश्रः

# श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य 'स्फुरणम्' इत्याख्यः त्रयोदशो युवमहोत्सवः सम्पन्नः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य ऐषमः “स्फुरणम्” इत्याख्यः त्रयोदशो युवमहोत्सवः २५ तः २७ सितम्बर् २०१९ दिनाङ्केषु विश्वविद्यालयपरिसरे समायोजितः। 'यज्ञेन यज्ञमयजन्त देवाः' इति श्रुतिवचनं मनसि निधाय यज्ञेन सह अस्य युवमहोत्सवकार्यक्रमस्योद्घाटनं समापनञ्च अभवत्। कार्यक्रमेऽस्मिन् श्रीसोमनाथसंस्कृतविश्वविद्यालयेन सह संलग्नेभ्यः महाविद्यालयेभ्यः अशीत्यधिकपञ्चशतं छात्राः छात्र्यश्च शैक्षिक-चित्र-सांस्कृतिक-क्रीडादिस्पर्धासु भागग्रहणम् अकार्षुः।



गीरसोमनाथजनपदस्य समाहर्ता श्रीअजयप्रकाशः, कुलपतिः प्रो. गोपबन्धुमिश्रः इतरे च संस्कृतशोभायात्रायाः प्रारम्भे

पञ्चविंशतितमे दिनाङ्के प्रातः नववादने टावरचौकतः विश्वविद्यालयपरिसरं यावत् एका संस्कृतशोभायात्रा आयोजिता यस्यां श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्राः विविधेभ्यः महाविद्यालयेभ्यः समागताः छात्राः, विश्वविद्यालयस्य अधिकारिणः, स्पर्धकाः, प्राध्यापकाः कर्मचारिणश्च भागगृहणं कृतवन्तः। अस्याः संस्कृतशोभायात्रायाः प्रारम्भः विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः, गीरसोमनाथजनपदस्य समाहर्ता श्रीअजयप्रकाशवर्यश्च अकुरुताम्। विभिन्नेभ्यः महाविद्यालयेभ्यः समागताः स्पर्धकाः स्वमहाविद्यालयस्य अभिधानसूचकपट्टकं किञ्च “कन्या रक्ष्यताम्, कन्या पाठ्यताम्”, “विक्रमः एकः स्वच्छतादिशि”, “स्वच्छं भारतं स्वस्थं भारतम्” इति संस्कृतगिरालिखितानि प्रेरकानि वाक्यानि गृहीत्वा विश्वविद्यालयपरिसरं प्रापुः। तत्र कुलपतिः प्रो. गोपबन्धुमिश्रः त्रयोदशयुवमहोत्सवस्य ध्वजोत्तोलनं कृत्वा स्पर्धकैः आनीतम् अग्निदीपं यथास्थानं प्रास्थापयत्। तदनु कुलसचिवः डॉ. दशरथजादवः संस्कृतमाध्यमेन युवमहोत्सवप्रतिज्ञाम् अकारयत्।




युवमहोत्सवस्य दीपप्राकट्येन उद्घाटयन्तः देवप्रसादमहाराजः, प्रो. गोपबन्धुमिश्रः इतरे च महानुभावाः

अथोऽथ तस्मिन्नेव दिवसे एकादशवादने अस्य युवमहोत्सवस्य उद्घाटनकार्यक्रमः समारब्धः। उद्घाटनकार्यक्रमेऽस्मिन् मुख्यातिथित्वेन गुजरातराज्यस्य सुप्रसिद्धः प्रवाचकः परमपूज्यः महन्तश्रीदेवप्रसादमहाराजः, अतिथिविशेषरूपेण वेरावल-पाटण-संयुक्तनगर-पालिकायाः प्रमुखा श्रीमती मञ्जुलाबेनसुयाणीमहोदया, सारस्वतातिथिरूपेण सौराष्ट्र-विश्वविद्यालयस्य कुलपतिः डॉ. नितिनकुमार पेथाणी, अध्यक्षत्वेन श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रश्च उपस्थिताः आसन्। कार्यक्रमस्य प्रारम्भे कुलसचिवः अभ्यागतानाम् अतिथिवर्याणां शाब्दिकं स्वागतपुरस्सरं तेषां परिचयं प्रादात्। किञ्च तेन त्रयोदशयुवमहोत्सवस्य दिवसत्रयात्मकः कार्यक्रमः, स्पर्धाः, स्पर्धकाः इत्यादिविषयेऽपि विवरणं प्रादायि। अस्मिन् उद्घाटनकार्यक्रमे योगविभागस्य बालिकाः सुन्दरं योगकौशलं प्रदर्श्य सर्वान् अतोषयन्। श्रीमती मञ्जुलाबेनसुयाणीवर्या सोमनाथस्य पवित्रधरां प्रणम्य युवमहोत्सवस्य सफलायोजनाय विश्वविद्यालयं शुभकामनाभिः व्यभूषयत्। सारस्वतातिथिरूपेण वदता सौराष्ट्रविश्वविद्यालयस्य कुलपतिना श्रीमता डॉ. नितिनकुमारपेथाणीवर्येण अभाणि यत् स्वस्थे शरीरे स्वस्थं मनस्तिष्ठति। अयं युवमहोत्सवः यूनां युवत्वं पुनः नवीनीकृत्य तेषाम् आन्तरिकीं शक्तिं संवर्ध्य तान् सृजनात्मककार्यं कर्तुं प्रेरयति। प्रवेश-परीक्षा-परिणाम-प्रवृत्तिभिः संयुक्तोऽयं युवमहोत्सवः अस्माकं सांस्कृतिकपरम्परां संस्कृतिञ्च सिञ्चति।



उद्घाटनकार्यक्रमे विश्वविद्यालयस्य योगविभागच्छात्राभिः योगप्रदर्शनस्य किञ्चन दृश्यम्

समारोहे मुख्यातिथिरूपेण समागतः आणदाबाबासेवासंस्थानस्य अध्यक्षः महन्तश्रीदेवप्रसादमहाराजः अवादीत् यत् “यूनां महोत्सवः इति युवमहोत्सवः। अत्रागताः अशेषस्पर्धकाः विजेतारः सन्ति यतो हि ते अस्मिन् युवमहोत्सवे भागं गृहीतवन्तः। अयं युवमहोत्सवः “शरीरमाद्यं खलु धर्मसाधनम्” इति सूत्रगुम्फितां संस्कृतभणितिं सम्पोषयति” इति।



संस्कृतशोभायात्रां समवेताः संस्कृतच्छात्राः




(वामतः) डॉ. दशरथजादवः, प्रो. गोपबन्धुमिश्रः, श्रीदेवप्रसाद-महाराजः, प्रो. नितिनपैथाणी, श्रीमती मञ्जुलाबेनसुयाणी च



विश्वविद्यालयपरिसरे वृक्षारोपणं कुर्वन् माननीयः शिक्षणमन्त्री श्रीभूपेन्द्रसिंहचूडासमावर्यः



यज्ञशालायाम् आहुतिं विदधानः माननीयः शिक्षणमन्त्री श्रीभूपेन्द्रसिंहचूडासमावर्यः




त्रयोदशयुवमहोत्सवस्य समापनसमारोहे उपस्थिताः शिक्षणमन्त्रिप्रभृतयः महानुभावाः

पूज्यमहाराजेन अस्मिन्नवसरे विश्वविद्यालयाय २,११,१११ रूप्यकाणां धनदानस्य उद्घोषणाऽपि अकारि।

विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः अस्मिन्नवसरे न्यगादीत् यत् अयं विश्वविद्यालयः स्वस्थापनायाः चतुर्दशवर्षाणि सम्पूर्य सम्प्रति बाल्यावस्थातः किशोरावस्थां प्रति प्रसरति। अतः अस्मिन् युवमहोत्सवे उपस्थितानां सर्वेषाम् अध्यापकानां, निर्णायकानां, स्पर्धकानां, छात्राणाञ्च हृदये युवत्वं तरङ्गायते। प्रोत्साहनं प्रगतिः पूर्णता चेति लक्ष्यं संसाध्य अयं युवमहोत्सवः सर्वान् प्रसिद्धिं प्रापयतीति तेन योजितम्। उद्घाटनकार्यक्रमान्ते युवमहोत्सवस्य संयोजकान्यतमः डॉ. जयेशमुङ्गरा आभारभावं समर्पयत्। अत्र मञ्चसञ्चालनं डॉ. पङ्कजकुमाररावलः अकरोत्।

अस्मिन् त्रयोदशे युवमहोत्सवे शैक्षिक-सांस्कृतिक-चित्रस्पर्धाः समायोजिताः। यत्र रङ्गवल्ली, एककसंस्कृतगीतम्, एककशास्त्रीयगानम्, एककशास्त्रीयवादनम्, एककशास्त्रीयनृत्यम्, सङ्घनृत्यम्, एकपात्राभिनयः, संस्कृतसुभाषितकण्ठपाठः, वादविवादस्पर्धा, स्फूर्तिस्पर्धा, साहित्यरचना, आशुभाषणम्, आशुचित्रणम्, व्यङ्गचित्रम्, योगासनम्, मल्लयुद्धम्, धावनम्, कबड्डी, दीर्घकूर्दनम्, उच्चकूर्दनम्, चतुरङ्गम्, क्षेपणम्, हस्तकन्दुकम्, बैडमिन्टनादिस्पर्धाः आयोजिताः आसन्। आसु स्पर्धासु सर्वेऽपि स्पर्धकाः स्वकौशल्यं प्रदर्श्य प्रथम-द्वितीय-तृतीयक्रमाङ्कान् प्राप्तवन्तः।

सप्तविंशतितमे दिनाङ्के पूर्वाह्णे एकादशवादने विश्वविद्यालयपरिसरे गुजरातराज्यस्य माननीयशिक्षामन्त्रिणः श्रीभूपेन्द्रसिंहचुडासमामहोदयस्य करकमलाभ्यां जूनागढक्षेत्रस्य सांसदस्य श्रीराजेशचुडासमामहोदयस्य, माननीयकुलपतेः प्रो. गोपबन्धुमिश्रमहोदयस्य च उपस्थितौ 'गार्गीमहिलाछात्रावास-पातञ्जलयोगभवन' इति भवनद्वयस्य शिलान्यासः सम्पन्नः। अस्मिन्नवसरे माननीयशिक्षामन्त्रिणा अन्यैश्च महानुभावैः विश्वविद्यालयपरिसरे वृक्षारोपणमपि कृतम्। अस्य "स्फुरणम्" इत्याख्यस्य त्रयोदशयुवमहोत्सवस्य समापनकार्यक्रमः पुरस्कारवितरणसमारोहश्च विश्वविद्यालयपरिसरे सार्धैकादशवादने समायोजितः। कार्यक्रमस्य प्रारम्भे कुलपतिः प्रो. गोपबन्धुमिश्रः स्वागतभाषणं युवमहोत्सवस्य उद्देश्यं विवरणं च प्रास्तौत्। किञ्च अस्मिन्नवसरे तेन न्यगादि यत् अद्य स्वामिविवेकानन्दस्य १२६तमजन्मतिथिः वर्तते, अतः तेन दर्शितः मार्गः नूनं सर्वेभ्यः कल्याणवहो वर्तते। माननीयकुलपतिना प्रो. मिश्रेण "Miles to go, miles to go, miles to go, when I step forward, the sky is limit" इति मन्त्रेण सर्वेऽपि उपस्थितच्छात्राः स्पर्धकाश्च प्रेरिताः। अस्मिन् समापनकार्यक्रमे योगविभागस्य छात्राः नृत्यगीताभिनयैः सह योगासनं कृत्वा उपस्थितान् सर्वान् व्यमोहयन्। सारस्वतातिथिरूपेण समागतः स्वर्णिमगुजरातस्पोर्टसविश्वविद्यालयस्य कुलपतिः डॉ. अर्जुनसिंहराणा अकथयत् यत् यूनां प्रतिभायाः प्रकटीकरणाय एतादृशः कर्यक्रमः अवश्यमेव आचरणीयः। माननीयस्य प्रधानमन्त्रिणः नरेन्द्रमोदीमहोदयस्य Fit India इत्यभियाने सर्वे भारताः अवश्यं भागं गृह्णीयुः इति तस्य विशेषोक्तिः। अतिथिविशेषरूपेण वदता श्रीराजेशचूडासमावर्येण उक्तं यत् सम्प्रति बालिकाः विविधेषु क्रीडादिक्षेत्रेषु स्वकौशलं प्रदर्श्य अस्मान् सर्वान् प्रेरयन्ति।

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन कन्याप्रोत्साहनाय अस्मिन्नवसरे बालिकाद्वयी सम्मानिता। तत्र भारतीयमहिलाहस्तकन्दुकक्रीडायाः प्रमुखा किञ्जल-वाला किञ्च विश्वयोगप्रतियोगितायां प्राप्तरजतपदका श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य योगविभागीया छात्रा अल्पा मञ्चस्थमहानुभावानां करकमलैः सम्मानपत्रं प्राप्नुताम्।

अस्मिन् सम्पूर्तिसमारोहे मुख्यातिथिरूपेण गुजरातराज्यस्य शिक्षणमन्त्री श्रीभूपेन्द्रसिंह-चूडासमावर्यः समुपातिष्ठत्। सर्वादौ सः प्रथमज्योतिर्लिङ्गक्षेत्रे अत्यन्तं रमणीयस्य युवमहोत्सवस्य आयोजनाय विश्वविद्यालयम् अभ्यनन्दयत्। चतुर्दशवर्षाणाम् अल्पीयसे काले अयं विश्वविद्यालयः संस्कृताध्ययनाध्यापनक्षेत्रे भूयसीं प्रगतिम् अकरोत् तदर्थं विश्वविद्यालयस्य कुलपतिः, प्राध्यापकाः, अधिकारिणः, कर्मचारिणश्च अभिनन्दनार्हाः वर्तन्ते किञ्च गुजरातसर्वकारः अस्य विश्वविद्यालयस्य सर्वविधविकासाय प्रत्येकं क्षेत्रे साहाय्यं करिष्यतीति स अब्रवीत्।

सम्पूर्तिसमारोहस्य अध्यक्षः कुलपतिः प्रो. गोपबन्धुमिश्रः अभाणीत् यत् विविधस्पर्धासु उत्साहं प्रयत्नं धैर्यम् अनुशासनं क्षमतां विवेक इत्यादिगुणान् दृष्ट्वा अहम् अत्यन्तम् आनन्दमनुभवामि। स्पर्धायां पूर्णायां सत्यां स्पर्धकेषु परस्परं सौहार्दभावं वीक्ष्य समग्रगुजरातराज्यं प्रति प्रीतिञ्च अनुभवामि। अस्मिन् त्रयोदशे युवमहोत्सवे विजेतारः सर्वेऽपि स्पर्धकाः समग्रे राज्ये समग्रे भारते च गुजरातराज्यस्य गौरवं एधेरन् इति सः अकामयत्।

तदनु मञ्चस्थमहानुभावाः विश्वविद्यालयस्याधिकारिणश्च विविधस्पर्धासु विजेतृभ्यः प्रमाण-पत्रपूर्वकं स्वर्णादिपदकवितरणं कृतवन्तः। 'स्फुरणम्' इति त्रयोदशे युवमहोत्सवे आयोजितासु विविधस्पर्धासु सर्वाधिकान् १२२ अङ्कान् समवाप्य श्रीसोमनाथसंस्कृतविश्वविद्यालयः विजयवैजयन्तीं प्राप्नोत्। श्रीभागवतविद्यापीठन्याससञ्चालितशिक्षाशास्त्रिमहाविद्यालयः ८४ अङ्कान् सम्प्राप्य उपविजयवैजयन्त्या विभूषितः। किञ्च ४२ अङ्कान् सम्प्राप्य अहमदाबादस्थ-श्रीवरतन्तुसंस्कृतमहाविद्यालयः तृतीयं स्थानं प्राप्नोत्।

कार्यक्रमान्ते डॉ. शत्रुघ्नपाणिग्राही सर्वेभ्यः अतिथिवर्येभ्यः, निर्णायकेभ्यः, अध्यापकेभ्यः तथा च सहकारं प्रदत्तवद्भ्यः धन्यवादभणितिं प्राकाशयत्। अस्मिन्नवसरे मञ्चसञ्चालनं डॉ. पङ्कजकुमाररावलः अकरोत्। "स्फुरणम्" इत्याख्यस्य त्रयोदशयुवमहोत्सवस्य डॉ. शत्रुघ्नपाणिग्राही, डॉ. जयेशमुङ्गरा, श्रीरवीन्द्रकाले च कुलपतिकुलसचिवयोः मार्गदर्शने सर्वेषां प्राध्यापकानां, कर्मचारिणां छात्राणाञ्च सहयोगेन सफलसंयोजनं अकार्षुः।



समापनसमारोहे विश्वविद्यालयच्छात्राभिः योगप्रदर्शनम्



भूमिपूजनकार्यक्रमे महानुभावानाम् उपस्थितिः



समापनकार्यक्रमे उपस्थिताः महानुभावाः स्पर्धालवश्च







## स्फुरणम् इत्याख्यस्य त्रयोदशयुवमहोत्सवस्य उद्घाटनसमापनसत्रयोः कानिचन दृश्यानि







# 'स्फुरणम्' इत्याख्ये त्रयोदशे युवमहोत्सवे विभिन्नस्पर्धासु विजेतॄणां नामानि








### Running 100 Meters Male

| | | |
|---|---|---|
| 1 | Trivedi Parth Dharmeshbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Dave Shanikumar Dineshbhai | Shree A.V. Sanskrit Mahavedyalaya, DHORIVAV |
| 3 | Joshi Raj Satishbhai | Shree Vartantu Sanskrit Mahavidyalay, SOLA |

### Running 100 Meters Female

| | | |
|---|---|---|
| 1 | Mariya Divya Naranbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Rajgor Matangi Durgashankar | Shree Dakor Sanskrit Pathshala, DAKOR |
| 3 | Chaudhari Priyanka Bhimsingbhai | Navjagruti Sanskrit Mahavidhyalaya, VYARA |

### Running 200 Meters Male

| | | |
|---|---|---|
| 1 | Trivedi Harshad Bipinbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Trivedi Jay Nileshbhai | Darshanam Sanskrit Mahavidyalaya, CHHARODI |
| 3 | Sankhol Rohit Amarsinghbhai | Sant Sandhyagiri Bapu Sanskrit V.V., SAMAKHIALI |

### Running 200 Meters Female

| | | |
|---|---|---|
| 1 | Chaudhari Sneha Chemasingbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Gamit Payal Yogeshbhai | Navjagruti Sanskrit Mahavidhyalaya, VYARA |
| 3 | Rajgor Matangi Durgashankar | Shree Dakor Sanskrit Pathshala, DAKOR |

### Running 400 Meters Male

| | | |
|---|---|---|
| 1 | Trivedi Parth Dharmeshbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Gamit Vasant Sureshbhai | Navjagruti Sanskrit Mahavidhyalaya, VYARA |
| 3 | Jani Jatin Govindbhai | Shree B. V.T. Shikshashastri College, SOLA |

### Running 400 Meters Female

| | | |
|---|---|---|
| 1 | Chaudhari Sneha Chemasingbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Chaudahri Keyuri Dilipbhai | Navjagruti Sanskrit Mahavidhyalaya, VYARA |

### Running 1500 Meters Male

| | | |
|---|---|---|
| 1 | Trivedi Jay Nileshbhai | Darshanam Sanskrit Mahavidyalaya, CHHARODI |
| 2 | Joshi Dipakkumar Natwarlal | Shree Vartantu Sanskrit Mahavidyalay, SOLA |
| 3 | Maheta Dishantkumar Dilipkumar | Shri Gopal Krishna Sanskrit Maha., SIDDHPUR |

### CHESS Male

| | | |
|---|---|---|
| 1 | Thakar Rajeshkumar Govindbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 2 | Joshi Jay Sanjaykumar | Shree Narayan Sanskrit Mahavidyalaya, PETLAD |
| 3 | Thakar Gaurangbhai Mansukhbhai | Brahmarshi Satavalekar Sanskrit M., KILLA PARADI |

### CHESS Female

| | | |
|---|---|---|
| 1 | Suva Kinjal Bhurabhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Chaudahri Keyuri Dilipbhai | Navjagruti Sanskrit Mahavidhyalaya, VYARA |

### YOGA Male

| | | |
|---|---|---|
| 1 | Radadiya Ravi Mansukhbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Joshi Rahul Baldevbhai | Brahmarsi Sanskrit Mahavidyalaya, NADIAD |
| 3 | Jani Prakashkumar Tusharkumar | BAPS Swaminarayan Sanskrit Maha., SARANGPUR |

### YOGA Female

| | | |
|---|---|---|
| 1 | Lakhnotra Chandra Hajabhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Gamit Payal Yogeshbhai | Navjagruti Sanskrit Mahavidhyalaya, VYARA |

### WRESTLING KG 50

| | | |
|---|---|---|
| 1 | Khandeka Kishan Ranchhodbhai | Sant Sandhyagiri Bapu Sanskrit V.V., SAMAKHIALI |
| 2 | Trivedi Pratik Ganeshlal | Shree Vartantu Sanskrit Mahavidyalay, SOLA |
| 3 | Thakar Dhaval Kashyapkumar | Brahmarsi Sanskrit Mahavidyalaya, NADIAD |

### WRESTLING KG 51 to 55

| | | |
|---|---|---|
| 1 | Joshi Kiran Kanjibhai | Shree Narmada Sanskrit Ved Pathshala, BHARUCH |
| 2 | Jha Abhishek Jiteshbhai | S.K Patel S. Ved Sanskrit Mahavidyalaya, SURAT |
| 3 | Trivedi Harshal Bhupatbhai | Shree Somnath Sanskrit University, VERAVAL |

### WRESTLING KG 56 to 60

| | | |
|---|---|---|
| 1 | Joshi Kishan Rameshbhai | Bhagvan Yagnavalkya Ved Sanskrit Maha., MUDETI |
| 2 | Joshi Kishan Hetalkumar | Shree Dakor Sanskrit Pathshala, DAKOR |
| 3 | Raval Dharmang Jitendrabhai | Shree Narmada Sanskrit Ved Pathshala, BHARUCH |

### WRESTLING KG 61 to 66

| | | |
|---|---|---|
| 1 | Dave Deepkumar Vireshkumar | Shree Narmada Sanskrit Ved Pathshala, BHARUCH |
| 2 | Shiyani Ramesh Karabhai | Shree Somnath Sanskrit University, VERAVAL |
| 3 | Pandya Purvang Kumudchandra | Brahmarsi Sanskrit Mahavidyalaya, NADIAD |

### WRESTLING KG 67 to 74

| | | |
|---|---|---|
| 1 | Dave Jaydev Vinubhai | Shree Vartantu Sanskrit Mahavidyalay, SOLA |
| 2 | Pandya Sagarkumar Sureshbhai | Brahmarsi Sanskrit Mahavidyalaya, NADIAD |
| 3 | Labadiya Mehulkumar B. | Shree A.V. Sanskrit Mahavedyalaya, DHORIVAV |

### DISCUS THROW Male

| | | |
|---|---|---|
| 1 | Rajgor Vishal Ashvinbhai | Brahmarsi Sanskrit Mahavidyalaya, NADIAD |
| 2 | Bhatt Vrajesh Jaydipbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 3 | Joshi Kishanbhai Bharatbhai | Shree Vartantu Sanskrit Mahavidyalay, SOLA |

### DISCUS THROW Female

| | | |
|---|---|---|
| 1 | Gamit Sangita Gulabbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Chaudhari Saruta Ganjibhai | Navjagruti Sanskrit Mahavidhyalaya, VYARA |

### SHOT PUT Male

| | | |
|---|---|---|
| 1 | Joshi Dilip Anand | Shree A.V. Sanskrit Mahavedyalaya, DHORIVAV |
| 2 | Pandya Sagarkumar Sureshbhai | Brahmarsi Sanskrit Mahavidyalaya, NADIAD |
| 3 | Bhatt Vrajesh Jaydipbhai | Shree B. V.T. Shikshashastri College, SOLA |

### SHOT PUT Female

| | | |
|---|---|---|
| 1 | Gamit Sangita Gulabbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Gamit Ravinaben Balubhai | Navjagruti Sanskrit Mahavidhyalaya, VYARA |

### HIGH JUMP Male

| | | |
|---|---|---|
| 1 | Bhatt Mayank Arunbhai | Brahmarsi Sanskrit Mahavidyalaya, NADIAD |
| 2 | Pandya Mehul Nareshbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 3 | Sharma Rahul Radheshyam | Shree Vartantu Sanskrit Mahavidyalay, SOLA |

### HIGH JUMP Female

| | | |
|---|---|---|
| 1 | Asodariya Bhavti Sureshbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Gamit Manishaben Kunvarjibhai | Navjagruti Sanskrit Mahavidhyalaya, VYARA |

### LONG JUMP Male

| | | |
|---|---|---|
| 1 | Pandya Mehul Nareshbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 2 | Maheta Parth Sureshbhai | Shree Vartantu Sanskrit Mahavidyalay, SOLA |
| 3 | Joshi Kiran Kanjibhai | Shree Narmada Sanskrit Ved Pathshala, BHARUCH |

### LONG JUMP Female

| | | |
|---|---|---|
| 1 | Asodariya Bhavti Sureshbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Chaudhari Roshani Devsingbhai | Navjagruti Sanskrit Mahavidhyalaya, VYARA |
| 3 | Rajgor Matangi Durgashankar | Shree Dakor Sanskrit Pathshala, DAKOR |

### BADMINTON SINGLE Male

| | | |
|---|---|---|
| 1 | Gohil Avirat Pravinbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Jani Sharadkumar Ghanshyambhai | Shree Vartantu Sanskrit Mahavidyalay, SOLA |
| 3 | Vyas Kush Anilbhai | Brahmarsi Sanskrit Mahavidyalaya, NADIAD |

### BADMINTON SINGLE Female

| | | |
|---|---|---|
| 1 | Suva Kinjal Bhurabhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Chaudhari Priyanka Bhimsingbhai | Navjagruti Sanskrit Mahavidhyalaya, VYARA |

### BADMINTON DOUBLE Male

| | | |
|---|---|---|
| 1 | Gohil Avirat Pravinbhai | Shree Somnath Sanskrit University, VERAVAL |
| 1 | Joshi Dhruvin Hasmukhbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Vyas Kush Anilbhai | Brahmarsi Sanskrit Mahavidyalaya, NADIAD |
| 2 | Joshi Deep Navinchandra | Brahmarsi Sanskrit Mahavidyalaya, NADIAD |
| 3 | Joshi Shivamkumar Yogeshbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 3 | Upadhyay Nisarg Mauleshbhai | Shree B. V.T. Shikshashastri College, SOLA |

### BADMINTON DOUBLE Female

| | | |
|---|---|---|
| 1 | Suva Kinjal Bhurabhai | Shree Somnath Sanskrit University, VERAVAL |
| 1 | Mariya Divya Naranbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Chaudhari Roshani Devsingbhai | Navjagruti Sanskrit Mahavidhyalaya, VYARA |
| 2 | Chaudahri Keyuri Dilipbhai | Navjagruti Sanskrit Mahavidhyalaya, VYARA |

### AASHU CHITRAM

| | | |
|---|---|---|
| 1 | Dave Krutarth Raksheshkumar | Shree Narmada Sanskrit Ved Pathshala, BHARUCH |
| 2 | Sankaliya Vivek Chhelsankarbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 3 | Dhola Tarun Dineshbhai | BAPS Swaminarayan Sanskrit Maha., SARANGPUR |

### CARTOON PAINTING

| | | |
|---|---|---|
| 1 | Sankaliya Vivek Chhelsankarbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 2 | Dave Krutarth Raksheshkumar | Shree Narmada Sanskrit Ved Pathshala, BHARUCH |
| 3 | Sarma Kirti Kailashchandra | Shree Somnath Sanskrit University, VERAVAL |

### RANGOLI

| | | |
|---|---|---|
| 1 | Pandya Rita Kishorbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Joshi Kishan Kamleshbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 3 | Sharma Tijil Dhirendrabhai | Shree Vartantu Sanskrit Mahavidyalay, SOLA |
















### SANSKRIT SONG

| | | |
|---|---|---|
| 1 | Joshi Nikhilbhai Ashokbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 2 | Raval Chaitany Maheshbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 3 | Jani Hareshbhai Bimalbhai | Brahmarsi Sanskrit Mahavidyalaya, NADIAD Ndi |

### MONO SANSKRIT SONG

| | | |
|---|---|---|
| 1 | Joshi Nikhilbhai Ashokbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 2 | Joshi Jaydev Jigneshbhai | Shree Vartantu Sanskrit Mahavidyalay, SOLA |
| 3 | Pandya Dhrumil Narendrakumar | Brahmarsi Sanskrit Mahavidyalaya, NADIAD |

### SHUBHASHIT KANTH PATH

| | | |
|---|---|---|
| 1 | Dave Neel Jagdishbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Vyas Manav Vipulbhai | Shree Narmada Sanskrit Ved Pathshala, BHARUCH |
| 3 | Bambhaniya Hiten Prakashbhai | Shree A.V. Sanskrit Mahavedyalaya, DHORIVAV |

### MONO ACTING

| | | |
|---|---|---|
| 1 | Dave Neel Jagdishbhai | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Trivedi Dhruv Tusharbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 3 | Sevak Dipak Umeshbhai | Shree Vartantu Sanskrit Mahavidyalay, SOLA |

### GROUP DANCE

1 BAPS Swaminarayan Sanskrit Mahavidyalaya, SARANGPUR
2 Shree Somnath Sanskrit University, VERAVAL
3 Shree B. V. Tust Sanchalit Shikshashastri College, SOLA

### CLASSICAL DANCE

| | | |
|---|---|---|
| 1 | Pandya Janak Nvinbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 2 | Pandya Rita Kishorbhai | Shree Somnath Sanskrit University, VERAVAL |
| 3 | Chanv Hardik Dineshbhai | Shree A.V. Sanskrit Mahavedyalaya, DHORIVAV |

### CLASSICAL INSTRUMENTAL

| | | |
|---|---|---|
| 1 | Pandit Parthkumar Nareshbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 2 | Tripathi Hariom | Shree Muktanand Sanskrit Mahavidyalaya, MAGOD |
| 3 | Joshi Kuldip Jayeshbhai | Shree A.V. Sanskrit Mahavedyalaya, DHORIVAV |

### AASHU BHASHANAM

| | | |
|---|---|---|
| 1 | Joshi Sahdev Pravinchandra | Shree B. V.T. Shikshashastri College, SOLA |
| 2 | Jani Prakashkumar Tusharkumar | BAPS Swaminarayan Sanskrit Maha., SARANGPUR |
| 3 | Valanger Hardikkumar Bharatbhai | Shree B. V.T. Shikshashastri College, SOLA |

### VAD-VIVAD (PAKSHA)

| | | |
|---|---|---|
| 1 | Valanger Hardikkumar Bharatbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 2 | Upadhyay Aditya Hasmukhabhai | Brahmarsi Sanskrit Mahavidyalaya, NADIAD |
| 3 | Pandey Keshav Kumar | Shree Somnath Sanskrit University, VERAVAL |

### VAD-VIVAD (VIPAKSHA)

| | | |
|---|---|---|
| 1 | Bhatt Saurabhkumar Jagdishbhai | Shree Vartantu Sanskrit Mahavidyalay, SOLA |
| 2 | Joshi Tushar Kanaiyalal | Shree B. V.T. Shikshashastri College, SOLA |
| 3 | Jani Abhishek Dhirajlal | Brahmarshi Satavalekar Sanskrit M., KILLA PARADI |

### SAHITYA RACHNA

| | | |
|---|---|---|
| 1 | Bhatt Saurabhkumar Jagdishbhai | Shree Vartantu Sanskrit Mahavidyalay, SOLA |
| 2 | Thakar Rajeshkumar Govindbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 3 | Joshi Sahdev Pravinchandra | Shree B. V.T. Shikshashastri College, SOLA |

### VOLLEY-BALL

1 Shree Anadababa Vedanta Sanskrit Mahavedyalaya, DHORIVAV
2 Shree Muktanand Sanskrit Mahavidyalaya, MAGOD
3 Brahmarsi Sanskrit Mahavidyalaya, NADIAD

### KABADDI

1 Shri Ambika Sanskrit Mahavidyalaya, AMBAJI
2 Navjagruti Sanskrit Mahavidhyalaya, VYARA
3 Shree Somnath Sanskrit University, VERAVAL

### QUIZ

| | | |
|---|---|---|
| 1 | Joshi Dhruvin Hasmukhbhai | Shree Somnath Sanskrit University, VERAVAL |
| 1 | Pandey Keshav Kumar Sanjay | Shree Somnath Sanskrit University, VERAVAL |
| 2 | Thakar Rajeshkumar Govindbhai | Shree B. V.T. Shikshashastri College, SOLA |
| 2 | Joshi Tushar Kanaiyalal | Shree B. V.T. Shikshashastri College, SOLA |
| 3 | Joshi Chetan Rameshkumar | Shree Vartantu Sanskrit Mahavidyalay, SOLA |
| 3 | Bhatt Saurabhkumar Jagdishbhai | Shree Vartantu Sanskrit Mahavidyalay, SOLA |













# वार्तापत्रेषु श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य स्पन्दनम्

૧૦ ફૂલછાબ રાજકોટ

## યુવક મહોત્સવ યુવાધનની આંતરિક કલા-શક્તિ ખિલવવાનો અવસર છે

■ સોમનાથ યુનિવર્સિટી પ્રથમ ક્રમે વિજેતા: બીજા-ત્રીજા ક્રમે અમદાવાદની યુનિવર્સિટી



સોમનાથ સંસ્કૃત યુનિવર્સિટીના ત્રિદિવસીય યુવક મહોત્સવ ... શિક્ષણમંત્રી, સાંસદની હાજરીમાં સમાપન. (તસ્વીર ...)

## સોમનાથ સંસ્કૃત યુનિવર્સિટીનો યુવક મહોત્સવ સંપન્ન

૪૦ સ્પર્ધાઓમાં ૫૯૦ સ્પર્ધકોએ ઉત્સાહભેર ભાગ લીધો: યજમાન સંસ્થા ૧૨૨ ગુણાંક સાથે પ્રથમ: વિજય વૈજયન્તી ટ્રોફી મેળવી



## સોમનાથ સંસ્કૃત યુનિવર્સિટીના ૧૩મા યુવક મહોત્સવનો પ્રારંભ

વિવિધ ૪૦ હરિફાઈમાં ત્રણ દિવસ દરમિયાન ૫૯૦ સ્પર્ધકો કૌવત દેખાડશે



સોમનાથ સંસ્કૃત યુનિ. ના યુવક મહોત્સવના પ્રારંભે દિપ પ્રાગટ્ય કરતા મહાનુભાવો તસ્વીરમાં નજરે પડે છે. (તસ્વીર: રાજેશ ઠકરાર વેરાવળ)

## વાજતે - ગાજતે નીકળેલી સંસ્કૃત શોભાયાત્રા

## સોમનાથ સંસ્કૃત યુનિવર્સિટીનાં ૧૩ ... યુવક મહોત્સવનો દબદબાભેર પ્રારં...

આજથી બે દિવસ ૪૦ સ્પર્ધાઓમાં અવ્વલ આવવા ... ૩૧ મહાવિદ્યાલયોનાં ૫૯૦ સ્પર્ધકો બતાવશે અનેરૂં કૌ...



સોમનાથ સંસ્કૃત યુનિ.નાં યુવક મહોત્સવનાં પ્રારંભે સંસ્કૃત શોભાયાત્રા.

આજે અને કાલે મલ્લ યુ... સહિતની અનેક સ્પર્ધા...

## ...થ સંસ્કૃત યુનિ.નાં 13મા યુવક ...

...બદાર, પ્રમાણિક અને દેશભક્ત બનો એવી છાત્રોને ટકોર



યુવાનોને અભિનંદન પાઠવ્યા હતા. તેમણે આ પ્રસંગે કહ્યું કે માત્ર 14 વર્ષના ટૂંકા ગાળામાં શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટીએ સંસ્કૃત અધ્યયન-અધ્યાપન ક્ષેત્રે કરેલ નોંધપાત્ર સફળતા મેળવી છે. શિક્ષણ વિભાગે આ યુનિવર્સિટીને સંસ્કૃતના ઉત્થાન હેતુ રૂ.5.72 કરોડ ફાળવ્યાં તેમ જણાવ્યું હતું. તેમણે કહ્યું કે પગ તૂટ્યા પછી પણ માઉન્ટ એવરેસ્ટ સર કરવાની આંતરિક પ્રબળ ઈચ્છાએ માઉન્ટ એવરેસ્ટ સર કરે છે. જેના આદર્શ સ્વામી વિવેકાનંદ છે. મંત્રીશ્રીએ વિદ્યાર્થીઓને શીખ આપતા કહ્યું કે, વિશ્વાસુ, જવાબદાર, પ્રમાણિક અને દેશભક્ત બનવા અનુરોધ કર્યો હતો. આ તકે કુલસચિવ દશરથ જાદવ, વેરાવળ પાટણ પાલિકાના પ્રમુખ મંજુલાબેન સુયાણી, અગ્રણી ઝવેરીભાઈ ઠકરાર સહિતના અને મોટી સંખ્યામાં વિદ્યાર્થીઓ ઉપસ્થિત રહ્યા હતા. કાર્યક્રમનું સંચાલન યુનિવર્સિટી સંચાલિત સંસ્કૃત કોલેજના પ્રાધ્યાપક ડો. પંકજ રાવલે ...

## સોમનાથ સંસ્કૃત યુનિ.નાં 13મા યુવક ...

વિશ્વાસુ, જવાબદાર, પ્રમાણિક અને દેશભક્ત બનો એવી છાત્રોને ટકોર

ભાસ્કર ન્યૂઝ | વેરાવળ

સોમનાથ સંસ્કૃત યુનિવર્સિટીના 13 મા યુવક મહોત્સવમાં આજે અંતિમ દિવસે શિક્ષણમંત્રી ભુપેન્દ્રસિંહ ચુડાસમા અને મહાનુભાવોના હસ્તે યુનિ.ના પરિસરમાં ગાર્ગી મહિલા છાત્રાવાસ અને પાતંજલ યોગભવનનુ ભુમિપુજન કર્યું હતું. આ સમારોહમાં શિક્ષણમંત્રી ભુપેન્દ્રસિંહ ચુડાસમાએ ગુજરાત સરકાર વતી રમતગમત અને યોગ ક્ષેત્રે ગુજરાતનું નામ રોશન કરનાર બંને દીકરીઓ કિંજલ વાળા અને અલ્પા વાળાને અને તેમના પરિવારને અભિનંદન પાઠવી યુવક ...



## छात्रप्रातिभवैभवम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य त्रयोदशे युवमहोत्सवे “**कन्यका पाल्यतां कन्यका पाठ्यताम्**” इति विषये समस्यापूर्तिस्पर्धायां विविधच्छात्रैः रचितानि पद्यानि –

### (१) – कन्यारक्षणाष्टकम्

विश्वसम्पोषिका विश्वसंवर्धिका शक्तिरूपा शिवा विश्वमूलाऽमला।
देवरूपा दयामूर्तिरूपा सदा कन्यका पाल्यतां कन्यका पाठ्यताम्॥१॥
साम्प्रते तान्त्रिके जागृते शैक्षिके सर्वतन्त्रे स्वतन्त्रे नभश्चुम्बिते।
वैश्विके त्यक्तकुश्रद्धशिक्षायुगे कन्यका पाल्यतां कन्यका पाठ्यताम्॥२॥
कल्पना चावला दीपिका सायना पी.वी.सिन्धुः स्मृतिर्मेरिकोमेन्दिरा।
भारता दृश्यतां भारता गृह्यतां कन्यका पाल्यतां कन्यका पाठ्यताम्॥३॥
कार्यसम्मन्त्रिणी या स्वयंसेविका भोजने मातृका स्वप्नरम्भा मता।
धर्मसञ्चारिणी गेहसञ्चालिका कन्यका पाल्यतां कन्यका पाठ्यताम्॥४॥
मानवश्चन्द्रगो भौमभूमिं गतः, वोयजर्थानतः सूर्यवृत्तं जितम्।
तादृशे संयुगे हे जना! जाग्रतु कन्यका पाल्यतां कन्यका पाठ्यताम्॥५॥
सर्वकारोऽपि 'बेटी बचाओ' सदा योजनां लक्षवित्तैः सुसञ्चाल्यते।
मोदिवाक्यं शिवं सख! आगम्यतां कन्यका पाल्यतां कन्यका पाठ्यताम्॥६॥
पौरुषे प्राकृते भेदबोधो वृथा द्वे समाने सदा वेदवाक्यैः स्फुटम्।
तत् 'समानी व आकूति'-रेतद्यथा कन्यका पाल्यतां कन्यका पाठ्यताम्॥७॥
सुहृदागम्यतां भेदधीस्त्यज्यतां कन्यका सर्वतन्त्रेति सम्मन्यताम्।
उच्चतो गर्ज्यतां नादतो गर्ज्यतां कन्यका पाल्यतां कन्यका पाठ्यताम्॥८॥

*(त्रयोदशे युवमहोत्सवे प्रथमस्थानेनसभाजिता इयं रचना)*

रचयिता -
**भट्टः सौरभकुमार जगदीशभाई,**
श्रीवरतन्तुसंस्कृतमहाविद्यालयः,
सोला (अहमदाबाद)



### (२) - कन्यका पाल्यतां कन्यका पाठ्यताम्

सद्म वृन्दावनं यत्पदाम्भोरुहपातसंपावितं कारितं धारितम्।
देवता यापरा शारदैवापरा कन्यका पाल्यतां कन्यका पाठ्यताम्॥१॥
कृत्स्नमुर्वीतलं वा यया पालितं शारदारूपया भूरिशः पाठितम्।
हन्त! तत्रापि निम्नोक्तमापठ्यते कन्यका पाल्यतां कन्यका पाठ्यताम्॥२॥
यन्मुखान्निर्गता काकली शोभना सञ्चरन्ती गृहे पुण्यमातन्वती।
हर्षसंपूरितं या करोत्यन्तरं कन्यका पाल्यतां कन्यका पाठ्यताम्॥३॥
हे पितः! स्थीयतां साकमेह्येहि मे क्रीडितं पश्य ते सुता कथं क्रीडति।
इत्थमस्याः वचो मत्कृते जीवनं कन्यका पाल्यतां कन्यका पाठ्यताम्॥४॥
प्राणदात्री च या मातृरूपात्मका प्राणधर्त्री च या तत्स्वरूपा पुनः।
हन्त! तस्या दशा कीदृशी जायते? कन्यका पाल्यतां कन्यका पाठ्यताम्॥५॥
कन्यका काङ्क्षतां कन्यका जायतां कन्यकाशोभितं भूतलं नम्यताम्।
कन्यकाशक्तिरुज्जृम्भतां भूतले कन्यका पाल्यतां कन्यका पाठ्यताम्॥६॥
भो जनाः किं भवद्भिः सुधा काङ्क्ष्यते? गेहके स्वर्गसम्पन्मुदा भाव्यते?
तर्हि मे सद्वचः श्रूयतां तथ्यजं कन्यका पाल्यतां कन्यका पाठ्यताम्॥७॥
हन्त! यस्या दशामीदृशीं वीक्ष्य रे लेखदक्षापि मे लेखिनी कम्पते।
नाधिकं लिख्यते निम्नमाम्रेड्यते 'कन्यका पाल्यतां कन्यका पाठ्यताम्'॥८॥
धन्यधन्यं गृहं यद्गृहे कन्यका पुण्यपुण्यं जगत् कन्यकाशोभितम्।
मान्यमानो जनः कन्यकापत्यवान् कन्यका पाल्यतां कन्यका पाठ्यताम्॥९॥

*(त्रयोदशे युवमहोत्सवे द्वितीयस्थानेन सभाजिता इयं रचना)*

रचयिता –
**ठाकरः राजेशकुमार गोविन्दभाई,**
श्रीभागवतविद्यापीठट्रस्ट-शिक्षाशास्त्रि-
महाविद्यालयः, सोला (अहमदाबाद)



### (३) कन्यका पाल्यतां कन्यका पाठ्यताम्

(विषयमण्डनप्रस्तुतिः)

यो महावेदनातः प्रसूतः सुतः पोषितः दुष्करैः कर्मभिः पाठितः। आत्मनोऽद्यास्ति भार्यानिदेशे रतः कन्यका पाल्यतां कन्यका पाठ्यताम्॥१॥
वित्तवारैरसौ वैद्यकः कारितो लोकपीडारतोऽयं हि वित्तस्पृहः। रुग्णमाता सकृत्तेन नो दृश्यते कन्यका पाल्यतां कन्यका पाठ्यताम्॥२॥
सेवते पूर्वमेषा पितुः मन्दिरं सेवते सा च पत्युः पुनः मन्दिरम्। तां द्वयोः पितृपत्यालयोः देवतां कन्यका पाल्यतां कन्यका पाठ्यताम्॥३॥

(प्राप्तविषयखण्डनम्)

या हि पित्रा सदा लालिता पालिता पूरिता सर्वदुष्परणीयाः स्पृहाः।
प्रेममार्गा त्यजत्यद्य पित्रोर्गृहं कन्यका पाल्यतां कन्यका पाठ्यताम्॥१॥
या च मात्रा हि बाल्यात् सदा शिक्षिता रक्षिता दूषणात् भूषणैर्मण्डिता।
सा सखीमध्यगा मातृतो लज्जते कन्यका पाल्यतां कन्यका पाठ्यताम्॥२॥

*(त्रयोदशे युवमहोत्सवे तृतीयस्थानेन सभाजिता इयं रचना)*



रचयिता – **जोशी सहदेव प्रवीणचन्द्रः,** श्रीभागवतविद्यापीठट्रस्टसञ्चालितशिक्षाशास्त्रिमहाविद्यालयः, सोला (अहमदाबाद)

# छात्रप्रातिभवैभवम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य "संस्कृतसप्ताहोत्सवः-२०१९" इति कार्यक्रमे विविधस्पर्धासु **छात्रप्रातिभवैभवम्**

(१) **"स्वर्णायते संस्कृतभूमिरेषा"**

नरेन्द्रदेवेन्द्रविनोदवर्यैर्दीपेशशुक्लागुरुजानकीभिः।
पौराणिकैर्रावलसंस्कृतज्ञैः स्वर्णायते संस्कृतभूमिरेषा॥

(२) **"शर्करा तिक्ततां गता"**

चन्द्रश्चण्डकरत्वञ्च सूर्यः शीतत्वमेव च।
आकाशः सौरभत्वञ्च सागरः शुष्कतां गतः॥
अनुष्णतां गतश्चाग्निर्वायुश्चागन्धतां गतः।
कविसृष्टौ पुनस्त्वेषा शर्करा तिक्ततां गता॥



*रचयिता* – **देरासरी ऋषभः जीतेन्द्रभाई**,
आचार्य-द्वितीयवर्षम्, अनुस्नातकविभागः,
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य (१) चौधरी सङ्गीताबेन गोविन्दभाई (२) गामित शीलाबेन शिवाजीभाई इति द्वाभ्यां छात्राभ्यां २०१९ तमे वर्षे भारतसर्वकारस्य जनजातीयकार्यमन्त्रालयस्य "National Fellowship & Scholarship for Higher Education of ST Students" इति छात्रवृत्तिः सम्प्राप्ता।






२७-०९-२०१९ दिनाङ्के श्रीगोपालकृष्णट्रस्ट-जूनागढद्वारा बिलखा- ग्रामस्थ-आनन्दाश्रमे वक्तृत्वस्पर्धा समायोजिता आसीत्। अस्यां स्पर्धायां श्रीसोमनाथसंस्कृतविश्वविद्यालयसञ्चालितसंस्कृतमहाविद्यालयस्य द्वौ छात्रौ प्रथम-द्वितीयपुरस्काराभ्यां सभाजितौ अभवताम्।



(१) दवे नील जगदीशभाई – प्रथमपुरस्कारः
(२) गोहिल अविरत प्रवीणभाई – द्वितीयपुरस्कारः

गुजरातसर्वकारेण आयोजितस्य खेलमहाकुम्भस्य तालुकास्तरीय-कबड्डी-क्रीडायां श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्राः प्रथमस्थानं प्राप्तवन्तः। १३-०९-२०१९ दिनाङ्के सेण्ट-मेरी-हाय्-स्कूल इत्यत्र आयोजितायामस्यां स्पर्धायाम् इमे छात्राः भागमगृह्णन् – राजगोर जयदीपः, जोषी प्रकाशः, अबोटी शुभम्, पण्ड्या यशवन्तः, त्रिपाठी ऋषिः, दवे रोहितः, सियाणी रमेशः, जोषी स्मितः, रादडिया रविः, राज्यगुरुः जयदीपः, सियाणी जयेशः च।



## आदित्यबिरलापब्लिकविद्यालये समायोजिते संस्कृतदिवसकार्यक्रमे छात्राणां विशेषप्रदर्शनम्

वेरावलनगरस्थेन आदित्यबिरलापब्लिकविद्यालयेन स्वपरिसरे ०७-०८-२०१९ तमे दिनाङ्के संस्कृतदिवसः समायोजितः आसीत् यत्र मुख्यातिथित्वेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतेः प्रो. गोपबन्धुमिश्रवर्यस्य उपस्थितिः आसीत्। अस्य संस्कृतदिवसोत्सवकार्यक्रमे आदित्यबिरलापब्लिक-विद्यालयस्य प्राचार्या श्रीमती नीपा रेजी वर्या, संस्कृताध्यापकः श्रीदिनेशशर्मा, विद्यालयस्य इतरे अध्यापकाः, श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य व्याकरण-प्राध्यापकः डॉ. दीपेश कतिरा च उपस्थिताः आसन्। अस्मिन् कार्यक्रमे विद्यालयस्य छात्रैः संस्कृतदिवसं निमित्तीकृत्य संस्कृतगीतानि अगीयन्त, संस्कृतभाषणानि अक्रियन्त, शास्त्रीयनृत्यञ्च अक्रियत। श्रीसोमनाथसंस्कृतविश्वविद्या-लयस्य छात्रौ दवे नीलः, राज्यगुरुः जयदीपश्च अस्मिन्नवसरे विशिष्टमेकं संस्कृतनाटकं प्रस्तुतवन्तौ। संस्कृतगिरा प्रस्तुतम् नाटकमिदम् अत्र उपस्थितेभ्यः सर्वेभ्यः भृशं प्रशंसितम्।



आदित्यबिरलापब्लिकविद्यालयस्य संस्कृतसमारोहे उपस्थितः कुलपतिः प्रो. गोपबन्धुमिश्रः अन्ये च

# श्रीसोमनाथसंस्कृतविश्वविद्यालये समायोजितः संस्कृतसप्ताहोत्सवः

'संस्कृतसप्ताहोत्सवः' विश्वविद्यालयद्वारा प्रतिवर्षं निर्वर्त्यमानेषु अत्यन्तं प्रमुखेषु कार्यक्रमेषु अन्यतमः। अस्मिन् वर्षे श्रावणपूर्णिमां लक्ष्यीकृत्य ऑगस्टमासस्य अष्टमात् दिनात् चतुर्दशं दिनं यावत् भव्यः संस्कृतसप्ताहोत्सवः समाचरितः। उत्सवस्य अस्य अङ्गतया विशिष्टव्याख्यानम्, संस्कृत-पाला-प्रस्तुतिः, राज्यस्तरीयसङ्गोष्ठी, विद्यालय-महाविद्यालयस्तरीयाणां विविधस्पर्धानाम् आयोजनं च कृतमासीत्। विश्वविद्यालयस्य प्राध्यापकौ डॉ. जानकीशरण आचार्यः, डॉ. दीपेश विनोद कतिरा च समग्रस्य अपि कार्यक्रमस्य संयोजनं कृतवन्तौ।




संस्कृतसप्ताहोत्सवस्य उद्घाटनसत्रे मञ्चस्थाः महानुभावाः

अस्य 'संस्कृतसप्ताहोत्सवः-२०१९' कार्यक्रमस्य उद्घाटनकार्यक्रमः ०८-०८-२०१९ तमे दिनाङ्के पूर्वाह्णे एकादशवादने विश्वविद्यालयस्य सभागारे समायोजितः आसीत्। विशिष्टस्यास्य संस्कृतोत्सवस्य उद्घाटनकार्यक्रमोऽपि अतिविशिष्टः आसीत्। कार्यक्रमस्यास्य आध्यक्ष्यम् ऊढवन्तः अस्य श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. गोपबन्धुमिश्रमहाभागाः। अवसरेऽस्मिन् विशिष्टव्याख्यानाय सुदूरात् देहलीनगरात् समागताः लालबहादुर-शास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य दर्शनसङ्कायाध्यक्षाः प्रो. हरेराम त्रिपाठिमहाभागाः स्वीयेन व्याख्यानेन समुपस्थितान् सर्वानपि श्रोतॄन् अनुगृहीतवन्तः। प्रो. त्रिपाठिना साम्प्रतिके काले संस्कृताध्ययनेन न केवलं शिक्षकत्वेन आजीविकायाः अवसरः वर्तते परम् विज्ञान-आभियान्त्रिक-परामर्शसेवादिक्षेत्रेषु अपि संस्कृताध्यापकानां कृते अवसराः समुपलभ्यन्ते।



'कीचकवधम्' इति शीर्षकयुतायाः विशिष्टायाः उत्कललोककलायाः प्रदर्शनम्

अस्मिन् संस्कृतसप्ताहोत्सवे विविधाः स्पर्धाः द्वयोः स्तरयोः समायोजिताः आसन्। तत्र प्रथमः उच्चमाध्यमिकस्तरः। अस्मिन् स्तरे भागं वोढुं नवमकक्षातः द्वादशकक्षां यावत् पठन्तः छात्राः वेरावल-सोमनाथ-नगरस्य विविधाभ्यः प्रतिष्ठितशालाभ्यः समागताः। द्वितीयः स्तरः महाविद्यालयीयच्छात्राणाम् आसीत्। अस्मिन् स्तरे विश्वविद्यालये शास्त्रि-आचार्यकक्षासु पठन्तः छात्राः भागमवहन्। उभयोः अपि स्तरयोः स्तोत्रकण्ठपाठस्पर्धा, वक्तृत्वस्पर्धा, समूहगानस्पर्धा, निबन्धलेखनस्पर्धा, कथाकथनस्पर्धा, रङ्गवल्लीस्पर्धा च समायोजिता। महाविद्यालयीयच्छात्राणां कृते समस्यापूर्तिस्पर्धा, स्फूर्तिस्पर्धाचापि आयोजिता आसीत्। विश्वविद्यालयस्य प्राध्यापकाः एव आसां स्पर्धानां संयोजनं कृतवन्तः। समेऽपि छात्राः सोत्साहम् आसु स्पर्धासु स्वीयं कौशलं प्रादर्शयन्।

संस्कृतसप्ताहोतसवस्य अङ्गतया ऑगस्टमासस्य त्रयोदशे दिवसे सायङ्काले वेरावलस्थे सरस्वतीविद्यालयस्य सभागारे संस्कृत-पाला-प्रस्तुतिः समायोजिता आसीत्। 'पाला' इत्येषा उत्कलीया प्रसिद्धा लोककला वर्तते। संस्कृतेन प्रस्तुतायाः 'कीचकवधम्' इति शीर्षकयुतायाः विशिष्टायाः पाला-प्रस्तुतेः कृते सुदूरात् उत्कलराज्यात् गदाधरदाशमहाभागः मिथुनादिसमन्वितेन स्वीयेन नटवृन्देन समं समायातः आसीत्। सुललितसंवादैः, सुभाषितैः, सूक्तिभिः, अभियुक्तोक्तिभिः, गानेन, नृत्येन, अभिनयेन च परिपुष्टा पालाप्रस्तुतिः श्रोतृगणं सुष्ठु समरञ्जयत्।




संस्कृतसप्ताहोत्सवस्य समापनावसरे मञ्चस्थाः महानुभावाः (वामतः) प्रो. अर्चनादुबे, प्रो. चेतनत्रिवेदी, प्रो. गोपबन्धुमिश्रः, डॉ. दशरथजादवः, डॉ. नरेन्द्रकुमारपण्ड्या च

अस्य संस्कृतसप्ताहोत्सवस्य समापनकार्यक्रमः १४-०८-२०१९ तमे दिनाङ्के अपराह्णे त्रिवादने विश्वविद्यालयस्य सभागारे समायोजितः आसीत्। समापनकार्यक्रमे विश्वविद्यालयस्य कुलपतयः प्रो. गोपबन्धुमिश्रमहोदयाः आध्यक्ष्यमवहन्। मुख्यातिथित्वेन समुपस्थिताः आसन् जूनागढस्थस्य भक्तकविनरसिंहमहेताविश्वविद्यालयस्य कुलपतयः प्रो. चेतन त्रिवेदिमहोदयाः। श्रीमतः त्रिवेदीमहोदयस्य विशिष्टभाषणात् परं महानुभावैः समग्रे संस्कृतसप्ताहे प्रवृत्तासु विविधस्पर्धासु विजयिनां छात्राणां पदकैः प्रमाणपत्रैः स्मृतिचिह्नैः च सम्माननं कृतम्। तदनु प्रो. गोपबन्धुमिश्रमहोदयाः आध्यक्षीयभाषणेन सर्वान् अनुगृहीतवन्तः। सर्वान्ते विश्वविद्यालयस्य कुलसचिवः डॉ. दशरथ जादवमहोदयः कृतज्ञताज्ञापनमकरोत्। इत्थं सम्पन्नः संस्कृतसप्ताहोत्सवः।

# संस्कृतसप्ताहोत्सवे विविधस्पर्धासु विजेतृणां सूची

## विद्यालयस्तरः (School Level)

### स्त्रोत्रकण्ठपाठ-स्पर्धा

1st वाला पारुल नारणभाई — एम. जे. स्वामीनारायण शाला, वेरावल
2nd रतनधायरा धृतिः — के. के. मोरी माध्यमिक शाला, वेरावल
3rd गढिया नचिकेत रामसिंहभाई — दर्शनविद्यालयः, वेरावल

### वक्तृत्व स्पर्धा

1st कुमारी पाल श्रुतिः — आदित्य बिरला हायस्कूल, वेरावल
2nd शाश्वत वाजा — आदित्य बिरला पब्लिकस्कूल, वेरावल

### निबन्धलेखन

1st यादव प्रीतिः फूलचन्द — आदित्य बिरला हाय स्कूल, वेरावल
2nd सोरठीया नाज अहमदभाई — श्रीमती मणिबेनकोटक हायस्कूल, वेरावल

### कथाकथन-स्पर्धा

1st भारती मिताली किशोरभाई — शेठ एम.पी. गर्ल्स हाय स्कूल, वेरावल
2nd यादव गोपालः श्यामकरण — आदित्य बिरला हाय स्कूल, वेरावल
3rd परमः सवजियानी — आदित्य बिरला पब्लिक स्कूल, वेरावल

### रङ्गवल्ली स्पर्धा

1st परमार रक्षा चन्दूभाई — शेठ एम.पी. गर्ल्स हाय स्कूल, वेरावल
2nd कानाबार फोरम मनीषभाई — आदित्य बिरला हाय स्कूल, वेरावल
3rd कशीष प्रसादः — आदित्य बिरला पब्लिक स्कूल, वेरावल

### समूहगान स्पर्धा

1st आदित्य बिरला पब्लिक स्कूल, वेरावल - (नीलय भट्ट, अंजली गोवरानी, श्वेता उदास, दिव्येश मालामाडी, क्रिस्टो, राजीव, देवर्षि विसावडीया, खुशी जैसवौर)

2nd श्रीमति मणिबेन कोटक हाय स्कूल, वेरावल - (पाठक मैत्रेय मेहलभाई, सिंघवड माधव दिनेशभाई, चावडा अजय डायाभाई, पांजरी पिंटू रसिकभाई, बामणीया जल्पा दिलखुशभाई, सिंघवड मानसी दिनेशभाई, रोय किरण बालेश्वरभाई)









## विश्वविद्यालयस्तरः (College/University Level)

### स्त्रोत्रकण्ठपाठ-स्पर्धा

1st सत्यव्रत पाण्डेयः — शास्त्री – II
2nd दवे नीलः — शास्त्री – II
3rd जोषी किशनः — शास्त्री – II

### वक्तृत्व-स्पर्धा

1st देरासरी ऋषभः — आचार्य – I
2nd ध्रुविन जोषी — आचार्य – I
3rd दवे निकुंजः — शास्त्री – II

### स्फूर्ति-स्पर्धा

1st मणिकान्त दूबे — आचार्य – I
1st रादडिया रविः — आचार्य – I
2nd दवे नीलः — शास्त्री – II
2nd प्रणव कश्यपः — आचार्य – I
3rd कृष्णकुमार पाण्डेयः — आचार्य – I
3rd विक्की कुमारः — शास्त्री – II

### समस्यापूर्ति-स्पर्धा

1st देरासरी ऋषभः — आचार्य – I
2nd पण्ड्या रिधमः — आचार्य – I
3rd जोषी ध्रुविनः — आचार्य – I

### रङ्गवल्ली-स्पर्धा

1st शर्मा सीमा — आचार्य – I
2nd शर्मा कीर्तिः — शास्त्री – III
3rd सत्यव्रत पाण्डेयः — शास्त्री – II

### निबन्धलेखन-स्पर्धा

1st देरासरी ऋषभः — आचार्य – II
2nd रादडिया रविः — आचार्य – I
3rd दवे नीलः — शास्त्री – II

### कथाकथन-स्पर्धा

1st शर्मा कीर्तिः — शास्त्री – III
2nd दवे नीलः — शास्त्री – II
3rd रादडिया रविः — आचार्य – I

### समूहगान स्पर्धा

1st व्यासगणः - आचार्य – I (जोषी ध्रुविन, पण्ड्या रिधम, रादडिया रवि, त्रिपाठी ऋषि, जोषी नीलेश, ठुमर ध्रुव)
2nd भारद्वाजगणः - शास्त्री – II - (सत्यव्रत पाण्डेय, अशवार विजय, अखिल पाण्डेय, सूर्यप्रकाश द्विवेदी, अंशुमान पाण्डेय)
3rd शुकदेवगणः - शास्त्री – II - (दवे नील, महेता प्रतीक, आस्तिक चिराग, मिश्रा अंकित, पाढिया जयदीप)



## श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रवृत्तं संस्कृतसम्भाषणशिबिरम्

प्रतिवर्षमिव २०१९तमे वर्षेऽपि शास्त्रिप्रथमवर्षे लब्धप्रवेशान् छात्रान् अनुलक्ष्य श्रीसोमनाथसंस्कृतविश्वविद्यालये संस्कृतसम्भाषणशिबिरं प्रवृत्तम्। शिबिरमेतत् जुलाई मासस्य विंशात् दिनात् प्रारभ्य अगस्तमासस्य चतुर्दशं दिनं यावत् प्राचलत्। संस्कृतसंभाषणे कौशलं सम्पादयितुमुत्सुकाः, तत्रापि विशिष्य शास्त्रिप्रथमवर्षीयाः आचार्यप्रथमवर्षीयाः च उपषष्टिः छात्राः शिबिरेऽस्मिन् भागमवहन्। वेरावलनगरे निवसन्तः केचन संस्कृतजिज्ञासवः नागरिकाः अपि अत्र अध्ययनमकुर्वन्। विश्वविद्यालयस्य छात्रौ मिरल व्यास, रवि रादडिया च व्याकरणप्राध्यापकस्य डॉ. दीपेश विनोद कतिरा महोदयस्य मार्गदर्शने शिबिरेऽस्मिन् अपाठयताम्। संस्कृतसप्ताहोत्सवेन सममेव अस्य शिबिरस्य समारोपो जातः। समारोपकार्यक्रमे मान्यवराणाम् अभ्यागतानां विदुषां पुरस्तात् शिबिरे अधीतवत्सु केश्चित् छात्रैः संस्कृतेन स्वानुभवकथनं कथाकथनं च कृतम्।








## विश्वविद्यालयीयच्छात्राणां फिल्म-क्लब

चलच्चित्रद्वारा विश्वविद्यालयीयच्छात्रेषु सत्प्रेरणासञ्चाराय, सद्गुणाधानाय, राष्ट्रियचरित्राधानाय च प्रतिशनिवासरं कक्ष्येतरकाले शैक्षणिकभवनस्य सभागारे फिल्मक्लबद्वारा चलच्चित्रप्रदर्शनं क्रियते। एतदङ्गतया अस्मिन् शैक्षणिकवर्षेऽपि नैकानि मोद-बोधप्रदानि चलच्चित्राणि छात्रेभ्यः प्रदर्शितानि। वरिष्ठ-गुजराती-साहित्यकारस्य 'तत्त्वमसि' इत्याख्यस्य प्रसिद्धस्य उपन्यासस्य आधारेण निर्मितं चलच्चित्रं 'रेवा', वरिष्ठसंगीतकारेण सुधीर फडके महोदयेन निर्मितं 'वीर सावर्कर' चेति चलच्चित्रे तत्र विशेषम् उल्लेखम् अर्हतः। डॉ. दीपेश विनोद कतिरा महोदयस्य मार्गदर्शने प्रचलतः अस्य उपक्रमस्य जयेश शियाणी, मयूर रावलः च छात्रसंयोजकौ स्तः।

## विश्वसिंहदिवसः समाचरितः विश्वविद्यालये

प्रतिवर्षम् ऑगस्टमासस्य दशमे दिनाङ्के विश्वसिंहदिवसः आचर्यते। गुजरातराज्यस्य प्रसिद्धस्य गीर-अभयारण्यस्थस्य सिंहस्य संरक्षणार्थं गुजरातसर्वकारस्य आदेशानुसारं श्रीसोमनाथसंस्कृतविश्वविद्यालयेऽपि १०-०८-२०१९ दिनाङ्के विश्वसिंहदिवसस्य आयोजनं राष्ट्रियसेवायोजनापक्षतः कृतम् आसीत्। अस्मिन् कार्यक्रमे सिंहविषयकजनजागरणाय विश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षा प्रो. अर्चनाकुमारीदुबे, संस्कृत-महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या, राष्ट्रियसेवायोजनायाः समन्वयकः डॉ. जयेशमुङ्गरा, राष्ट्रियसेवायोजनायाः अधिकारी डॉ. रमेशचन्द्र शुक्लः, व्याकरणविभागाध्यक्षः प्रो. विनोदकुमारझा, अन्ये प्राध्यापकाः, छात्राश्च विश्वविद्यालयपरिसरात् स्वमुखे सिंहस्य प्रतिकृतिं धृत्वा शोभायात्रामाध्यमेन सिंहरक्षणस्य सन्देशं प्रदत्तवन्तः। समग्रभारते गीर-अभयारण्यस्थाः सिंहाः अत्यन्तं प्रसिद्धाः वर्तन्ते। अतस्तेषां संरक्षणं कथं कर्तुं शक्यते इति विषये छात्राणां कृते मार्गदर्शनमपि कृतम्। अस्य समग्रस्य कार्यक्रमस्य संयोजनं डॉ. जयेशमुङ्गरा अकरोत्।






## वाग्वर्धिनीपरिषत् - २०१९-२०


वाग्वर्धिनीसभायाः अधिवेशनस्य एकं दृश्यम्

वाग्वर्धिनीपरिषदियं प्रतिवर्षमिव अस्मिन् वर्षेऽपि २०१९-२०२० मान्यकुलपतिवर्याणां शुभाशीर्वचोभिः अनुस्नातकविभागाध्यक्षप्राचार्ययोः मार्गदर्शने १०.०७.२०१९ दिनाङ्के गुरुवासरे समारब्धा। सभेयं प्रतिगुरुवासरं सायं ४.३० तः ६.०० वादनं यावत् विभिन्नविषयान् आश्रित्य प्रचलति। प्रत्येकस्मात् कक्ष्यातः छात्रद्वयस्य भागग्रहणाय अवकाशः भवति, योगविभागच्छात्राः तथा च तत्त्वाचार्यच्छात्राः अपि अत्र सोत्साहं भागग्रहणं कृत्वा विषयानुगुणं विद्वत्तापूर्णभाषणैः स्ववाक्कौशलं प्रदर्शयन्ति। अस्याः सभायाः सञ्चालनादिकं सर्वमपि कार्यं स्वयं छात्राः निर्वहन्ति। प्रथमेऽस्मिन्सत्रे उद्घाटनसभया सह ५ सत्राणि अभवन्। प्रतिवर्षमिव अस्मिन् वर्षेऽपि अस्माभिः कक्ष्याप्रतिनिधीनां चयनं कृतमस्ति। प्रत्येककक्ष्यायां प्रतिनिधिद्वयी कल्पिताऽस्ति। तद्यथा - शास्त्री -१, सालासिया श्रुतिः, पण्ड्या वत्सलश्च। शास्त्री -२, दवे नीलः सत्यव्रत पाण्डेयश्च। शास्त्री -३, व्यास मिरल, सत्यमकुमार पाठकश्च। आचार्यः -१, कृष्णकुमार पाण्डेयः, रवि रादडिया च। आचार्यः - २, धर्मेन्द्र जोषी। तत्त्वाचार्यः - शियाणी जयेशः। योगः - दिव्या मारिया च। वाग्वर्धिनीपरिषदः अध्वदर्शी - रावल मयूरः, आचार्य - २ । अस्याः परिषदः अध्यक्षा डा० उमामहेश्वरी, संयोजकौ - डा० शत्रुघ्न पाणिग्राही, डा० दिपेश विनोद कतिरा च।

## जनपदस्तरीयः वनमहोत्सवः विश्वविद्यालयपरिसरे समाचरितः

ऑगस्ट मासस्य चतुर्थदिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे गुजरातसर्वकारेण समायोजितः जनपदस्तरीयः वनमहोत्सवः सवैभवं समाचरितः आसीत्। गीरसोमनाथजनपदस्य वनविभागेन किञ्च श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितेऽस्मिन् वनमहोत्सवे मुख्यतया वृक्षारोपणकार्यक्रमः समायोजितः आसीत्, तदङ्गतया विभिन्नविद्यालयच्छात्रैः गीतानि, नाटकानि च प्रस्तुतानि आसन्।

अस्य वनमहोत्सवकार्यक्रमस्य उद्घाटनकार्यक्रमे बीजनिगमस्य अध्यक्षः श्रीराजसीभाई जोटवा, गीरसोमनाथजनपदस्य समाहर्ता श्रीअजयप्रकाशः, पुलिस-अधीक्षकः, स्थानीयः विधायकः श्रीविमलचूडासमा, गुजरातराज्यग्राम्योद्योगनिगमस्य अध्यक्षः श्रीमेघजीभाई-कणझरिया, गीरसोमनाथ-जनपदपञ्चायतप्रमुखा श्रीमती रैयाबेन-जालंधरा, वेरावलपाटनसंयुक्तनगरपालिकाप्रमुखा श्रीमती मञ्जुलाबेनसुयाणी, श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलसचिवः डॉ. दशरथजादवः, वेदविभागाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, अन्ये च अध्यापकाः, छात्राः, वनविभागस्य अधिकारिणः, कर्मचारिणश्च समुपातिष्ठन्। अस्मिन्नवसरे विभिन्नमहानुभावैः एतद्विषयकानि भाषणानि अपि अदीयन्त। वेरावलस्थविभिन्नविद्यालयानां छात्राः वृक्षाणां संरक्षणसंवर्धनविषये गीतमाध्यमेन, नाटकमाध्यमेन च प्रेरणां प्रदत्तवन्तः। कुलसचिवेन डॉ. दशरथजादववर्येण सह इतरैः महानुभावैः विश्वविद्यालयपरिसरे प्रायः २०० वृक्षाणां रोपणं विधाय तेषां वृक्षाणां रक्षणाय प्रतिवचनमपि स्वीकृतम्।


वृक्षारोपणं कुर्वन् कुलसचिवः डॉ. दशरथजादवः


वनमहोत्सवे मञ्चस्थाः महानुभावाः


वृक्षारोपणकार्यक्रमे उपस्थिताः महानुभावाः


वृक्षारोपणस्य किञ्चन दृश्यम्



जलसञ्चयनविषये व्याख्यानं विदधानः डॉ. जयेशमुङ्गरा

## जलसञ्चयनविषये व्याख्यानकार्यक्रमः

गुजरातराज्यसर्वकारः जलसञ्चयनविषये जनजागरणाय बहुविधान् प्रकल्पान् आयोजयति। एतदङ्गतया २६- ०९- २०१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालये जलसञ्चयनविषये एकं व्याख्यानम् आयोजितम्। राष्ट्रियसेवा-योजनायाः समन्वयकेन डॉ. जयेशमुङ्गरावर्येण “जलमेव जीवनम्” इति विषयकेन्द्रितं व्याख्यानं विधाय कथं जलसञ्चयनं कृत्वा तस्य उपयोगः कर्तुं शक्यते इति विषये उपस्थितेभ्यः छात्रेभ्यः मार्गदर्शनं प्रदत्तम्। अस्मिन् व्याख्याने उपस्थितेभ्यः छात्राध्यापकेभ्यः “सर्वदा जलस्य सञ्चयनं कुर्मः, तस्य दुरुपयोगं न कुर्मः” इति प्रतिज्ञा अपि स्वीकृता।

## सोत्साहं समाचरितः शिक्षकदिवसः

प्रतिवर्षं सितम्बरमासस्य पञ्चमे दिनाङ्के समग्रे भारते डॉ. सर्वपल्लीराधाकृष्णनवर्यस्य जन्मदिवसः शिक्षकदिवसत्वेन समाचर्यते। गुरुशिष्ययोः भवति कश्चन अपूर्वः सम्बन्धः। एतादृशस्य गुरुशिष्यसम्बन्धस्य अभिव्यक्तीकरणाय श्रीसोमनाथसंस्कृतविश्वविद्यालये अयं शिक्षकदिवसः अपूर्वतया समाचरितः ऐषमः। अस्मिन् दिने गुरुशिष्यसम्बन्धविषये विशिष्टव्याख्यानाय समागतः आसीत् दिव्यजीवनसङ्घ-शिवानन्दाश्रमात् स्वामी अध्यात्मानन्दः।




स्वामिनः अध्यात्मानन्दस्य स्वागतं कुर्वन् कुलपतिः प्रो. मिश्रः

विश्वविद्यालयस्य सभागारे प्रातः पादोनैकादशवादनतः सार्धद्वादशवादनं यावत् स्वामिनः अध्यात्मानन्दस्य विशिष्टं व्याख्यानम् अभूत्। अस्मिन् व्याख्याने विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः, कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चना दुबे, संस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या, वेदविभागाध्यक्षः प्रो. महेन्द्रकुमार-दवे, अन्ये सहाचार्याः, सहायकाचार्याः, विश्वविद्यालयस्य अधिकारिणः, कर्मचारिणः, अन्तेवासिनश्च समुपातिष्ठन्।

कार्यक्रमस्य आरम्भे कुलपतिना विश्वविद्यालयस्य परम्परानुसारं पादपप्रदानेन स्वामिनः अध्यात्मानन्दस्य स्वागतं व्यधायि। तदनु स्वामिना स्वकीयस्य व्याख्यानस्य आरम्भः वैदिकैः मन्त्रैः कृतः। तेनोक्तं यत् जीवने शिक्षकस्य उपस्थितिः पार्श्वसङ्गीतवत् भवति। यथा रङ्गमञ्चे पार्श्वसङ्गीतस्य उपस्थितिः न दृश्यते तथापि तस्मिन् सत्ये रङ्गमञ्चं सजीवं भवति। तथैव अस्माकं जीवनेऽपि प्रत्येकं स्थितौ शिक्षकस्य आवश्यकता भवति। अयञ्च शिक्षकः भिन्नभिन्नरूपेण भवितुमर्हति। शिक्षकः स्वशिष्यस्य जीवने धैर्यं विश्वासं कौशलवर्धनं सम्पोषयति येन सः स्वजीवने योग्यो नागरिको भवेत्। कस्यापि राष्ट्रस्य उन्नतिः तत्रत्यैः नागरिकैः भवति, तेषां योग्यानां नागरिकाणां निर्माणं शिक्षकः एव कर्तुं शक्नोति। स्वाम्यध्यात्मानन्देन एतदपि निगदितं यत् कश्चन शिक्षकः तदा एव योग्यः शिक्षकः भवितुमर्हति यदा स आत्मानं सर्वदा विद्यार्थी एव मन्येत। आदर्शः शिक्षकः आजीवनं विद्यार्थी भवति। नूतनज्ञानान्वेषणाय, शिष्यबुद्धिशुद्धिविकासाय, जगद्धिताय च सर्वदा तत्परो भवेत्। स्वव्याख्याने स्वामी अध्यात्मानन्दः दिव्यजीवनसङ्घस्य शिवानन्दाश्रमस्य च परिचयं सर्वेभ्यः प्रदाय उपस्थितान् सर्वान् योगविषयकं प्रात्यक्षिकं ज्ञानमपि प्रादर्शयत्। दिव्यजीवनसङ्घस्य गतिविधिविषये वदता स्वामिना एतदपि उक्तं यत् स्वजीवने सः एतावता पञ्चाशदधिकं रक्तदानम् अकरोत्। स्वामी अन्यान् अपि रक्तदानाय प्रेरितवान्।



विश्वविद्यालयपरिसरे वृक्षारोपणं कुर्वन् स्वामी अध्यात्मानन्दः

अस्मिन्नवसरे कार्यक्रमस्य अध्यक्षत्वेन भाषमाणेन कुलपतिना प्रो. गोपबन्धुमिश्रेण उक्तं यत् विद्यार्थिनः जीवने यथा गुरोः महत्त्वं भवति, गुरुं विना विद्यार्थिजीवनं लक्ष्यविहीनं भवति तथैव विद्यार्थिनं विनाऽपि गुरौ गुरुत्वं नायाति। विद्यार्थी गुरुत्वस्य पूरकं भवति। गुरुशिष्ययोः एतादृशसम्बन्धसत्ये एव ‘गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः’ इत्यादिवचनं सार्थकतां भजते। अतः गुरुशिष्ययोः सम्बन्धः अपूर्वः विद्यते। कार्यक्रमस्य अन्ते स्वामिना अध्यात्मानन्देन विश्वविद्यालयपरिसरे वृक्षारोपणं विधाय तस्य वृद्धिपर्यन्तं संरक्षणस्य दायित्वं स्वीकृतम्। अस्मिन् वृक्षारोपणकार्यक्रमे विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः, कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चनाकुमारीदुबे, अन्ये च प्राध्यापकाः, छात्राश्च उपस्थिताः आसन्।

## फिट्-इण्डिया कार्यक्रमस्य आरम्भः

२९-०९-२०१९ तमे दिनाङ्के खेलदिवसस्य अवसरे भारतस्य माननीयप्रधानमन्त्रिणा समग्रभारते फिट्-इण्डिया इत्याख्यस्य अभियानस्य आरम्भः कृतः आसीत्। तदङ्गतया श्रीसोमनाथसंस्कृतविश्वविद्यालये तस्मिन्नेव दिनाङ्के विश्वविद्यालयस्य सभागारे दृश्य-श्राव्यमाध्यमेन श्रीमतः नरेन्द्रमोदीवर्यस्य अयं कार्यक्रमः अन्तर्जालामाध्यमेन सर्वेभ्यः छात्रेभ्यः प्राध्यापकेभ्यश्च प्रदर्शितः आसीत्। एतस्मिन् कार्यक्रमे विश्वविद्यालयस्य कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चनादुबे, वेदसङ्कायाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या, अन्ये च प्राध्यापकाः, कर्मचारिणः छात्राः च उपस्थिताः आसन्। स्वकीयवक्तव्ये माननीयप्रधानमन्त्रिणा उक्तं यत् शारीरिकव्यायामः शरीरस्य बलमस्ति। शरीरं यदि स्वस्थम् अस्ति तर्हि मनः अपि स्वस्थं भवति। साम्प्रते काले आधुनिकयन्त्राणां प्रयोगकारणात् व्यायामं प्रति औदासीन्यं दृश्यते, तस्मात् अल्पे वयसि जनेषु रोगाधिक्यमपि जायते। फिट्-इण्डिया-अभियानं स्वस्थं भारतं प्रति महत्त्वपूर्णं सोपानमस्ति।



सभायां फिट्-इण्डियाविषये प्रतिज्ञां स्वीकुर्वन्तः प्राध्यापकाः छात्राश्च

अस्मिन्नवसरे विश्वविद्यालयस्य सभागारे उपस्थितेभ्यः सर्वेभ्यः प्राध्यापकेभ्यः छात्रेभ्यश्च प्रतिदिनं दशसहस्रं पदानि यावत् गमनस्य प्रतिज्ञा अपि स्वीकृता। तदनु सर्वे मिलित्वा तस्मिन्नेव दिने विश्वविद्यालयपरिसरे दशसहस्रपदानि यावत् धावनं कृतवन्तः। अस्य कार्यक्रमस्य मञ्चसञ्चालनं डॉ. जयेशमुङ्गरा अकरोत्।



विश्वविद्यालये प्रवृत्तमानस्य दशसहस्रपदानि यावत् गमनस्य दृश्यम्

## श्रीसोमनाथसंस्कृतपरिसरे राष्ट्रिय-सेवा-योजना-दिवसस्य आयोजनम्

२४-०९-२०१९ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे राष्ट्रिय-सेवा-योजना-दिवसस्य आयोजनम् अभूत्। एतदङ्गतया विश्वविद्यालयपरिसरे स्वच्छताकार्यक्रमः अपि समजायत। वेरावलनगरस्थ-स्वच्छतासमूहेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्रैः सह मिलित्वा प्रातः स्वच्छतां प्रति जागरणाय एका समूहयात्रा अपि आयोजिता। अस्मिन् अवसरे कुलपतिः प्रो. गोपबन्धुमिश्रः, कुलसचिवः डॉ. दशरथजादवः, वेदसङ्कायाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या, अन्य प्राध्यापकाः, अधिकारिणः, कर्मचारिणः, छात्राश्च उपस्थिताः आसन्। छात्रैः "हरितं वेरावलम्, स्वच्छं वेरावलम्", "स्वच्छं भारतम्, स्वस्थं भारतम्" इत्यादिवाक्यघटितसन्देशपट्टैः स्वच्छतां प्रति सन्देशः प्रदत्तः। अस्मिन्नवसरे कुलपतिः प्रो. गोपबन्धुमिश्रः उपस्थितान् सर्वान् स्वच्छतायाः महत्त्वविषये समबोधयत्। तदनु सर्वे छात्राः कर्मचारिणश्च विभिन्नप्राध्यापकानां निर्देशने समग्रविश्वविद्यालयपरिसरस्य स्वच्छताम् अकुर्वन्। अस्य कार्यक्रमस्य समग्रमपि संयोजनं डॉ. जयेशमुंगरा अकरोत्।



स्वच्छताविषयकजागरणकार्यक्रमस्य एकं दृश्यम्



स्वच्छताविषये उपस्थितान् सम्बोधयन् कुलपतिः प्रो. गोपबन्धुमिश्रः




दर्शनशास्त्रे व्याख्यानं विदधानः प्रो. रामकिशोरत्रिपाठिवर्यः

## दर्शनविषये व्याख्यानकार्यक्रमः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-दर्शनसङ्कायद्वारा १८-०७-२०१९ दिनाङ्के "दर्शनशास्त्रीयव्याख्यानमाला" आयोजिता आसीत्। व्याख्यानमालायामस्यां विद्यानगरीस्थ-श्रीसम्पूर्णानन्दसंसकृतविश्वविद्यालयस्य दर्शनसङ्कायाध्यक्षाः प्रो. रामकिशोरत्रिपाठिनः समागताः आसन्। तैः "दर्शनशास्त्रस्य सामान्यपरिचयः, तस्य वैशिष्ट्यम्" इति विषयमधिकृत्य सरलया पद्धत्या, दर्शनशास्त्राध्ययनस्य आवश्यकता, आधुनिकयुगे दर्शनानां वैशिष्ट्यम्, पुरुषार्थचतुष्टयादिविषयाः सुबोध्यया शैल्या सप्रमाणं युक्तिभिश्च व्याख्याताः। व्याख्यानमालायामस्याम् श्रीसोमनाथसंस्कृत-विश्वविद्यालस्य प्रधानपुरुषाः किञ्च वैयाकरणेषु मूर्धन्याः कुलपतिवर्याः प्रो. गोपबन्धुमिश्रवर्याः ध्यक्षपदमलङ्कृतवन्तः। तथा च राष्ट्रियसंस्कृतविद्यापीठम्-तिरुपतितः समायाताः प्रो.गणपति के. भट्टमहोदयाः, प्रो.जयप्रकाशनारायण द्विवेदी, प्रो.देवेन्द्रनाथपाण्डेयमहोदयाः मञ्चासीनाः आसन् । सभायाः सञ्चालनं दर्शनविभागस्य प्राध्यापकः डॉ. जानकीशरण आचार्यः अकरोत्। धन्यवादज्ञापनं सङ्कायाध्यक्षा डा. उमा महेश्वरी व्यज्ञापयत्।

## अद्वैतवेदान्त-पाठ्यक्रमनिर्माणसमितेः उपवेशनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-दर्शनसङ्कायद्वारा १८.०७.२०१९ दिनाङ्के विश्वविद्यालयस्य परिसरे दर्शनसङ्कायस्य अध्ययनसमित्याः आयोजनं कृतमासीत्। तत्र समित्या श्रीसोमनाथसंस्कृतविश्वविद्यालये अद्वैतवेदान्तः इति विषये शास्त्री तथा च आचार्यः इति द्वयोः स्तरयोः पाठ्यक्रमस्य निर्माणं कृतम्। एतैः महानुभावैः सर्वेषु संस्कृतविश्वविद्यालयेषु प्रचालितस्य अद्वैतवेदान्तविषयकस्य पाठ्यक्रमस्य अध्ययनं कृत्वा वर्तमानकाले जिज्ञासवच्छात्राः कथम् अद्वैतवेदान्तविषयान् अवगच्छेयुः इति लक्ष्यं मनसि निधाय अयः पाठ्यक्रमः निर्मितः। अध्ययनसमित्यामस्यां निम्नलिखिताः महानुभावाः उपस्थिता आसन् -

१. प्रो. रामकिशोर त्रिपाठी, श्रीसम्पूर्णानदसंस्कृतविश्वविद्यालयः, वाराणसी।
२. प्रो. के. गणपति भट्टः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः।
३. प्रो. जयप्रकाशनारायण द्विवेदी, द्वारका।
४. डा. उमामहेश्वरी बी., सङ्कायाध्यक्षा, श्रीसोमनाथसंस्कृतयुनिवर्सिटी।
५. डा. जानकीशरण आचार्य, प्राध्यापकः श्रीसोमनाथसंस्कृतयुनिवर्सिटी।



अद्वैतवेदान्तपाठ्यक्रमनिर्माणसमितेः एकं दृश्यम्

## विश्वविद्यालयपरिसरे सुरक्षाविषक-उपकरणानां प्रशिक्षणकार्यक्रमः

२२-०५-२०१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे कार्यरतानां कर्मचारिणां कृते अग्निशमनाय सुरक्षायन्त्राणां कथम् त्वरितोपयोगः करणीयः इति विषये कश्चन प्रशिक्षणकार्यक्रमः समायोजित आसीत्। अत्र सर्वेऽपि कर्मचारिणः सोत्साहं भागं स्वीकृत्य प्रशिक्षणं प्राप्तवन्तः।





## प्राध्यापकानाम् उपलब्ध्यः शैक्षिकगतिविधयश्च

**प्रो. अर्चनाकुमारी दुबे**

- २६ तः ३० ऑगस्ट २०१९ पर्यन्तं विश्वविद्यालयेन "अलङ्कारनिर्णयः" इति विषये आयोजितायां पञ्चदिवसीयसाहित्यशास्त्रीयकार्यशालायां भागं गृहीत्वा विशेषव्याख्यानमकरोत्।
- १४-०८-२०१९ दिनाङ्के "आधुनिकयुगे संस्कृतं तस्य आवश्यकता च" इति विषये एकदिवसीयराज्यस्तरीयसङ्गोष्ठ्यां भागमवाक्षीत्।
- १५- ०७-२०१९ दिनाङ्के राञ्चीविश्वविद्यालयस्य स्नातकोत्तरविभागेन आयोजिते सम्मेलने मुख्यातिथिरूपेण उपस्थाय "भारतीय नाट्यशास्त्र के परिप्रेक्ष्य में भास" इति विषये व्याख्यानमकरोत्।
- प्रकाशनम् - "रसानां सुखदुःखात्मकत्वम्" – विद्यारश्मिः (वार्षिकी राष्ट्रियशोधपत्रिका) ISSN 2277-6443, सप्तमोऽङ्कः, राष्ट्रियसंस्कृतसंस्थानम्।

**डॉ. जयेश डी. मुङ्गरा**

- विश्वविद्यालये विश्वयोगदिवसायोजने संयोजकरूपेण कार्यं विहितम्।
- २६-६-२०१९ – विश्वविद्यालये "जलसञ्चयनं जलमेव जीवनम्" इति विषये व्याख्यानमकरोत्। तस्मिन्नेव दिने "मादकपदार्थानां दुरुपयोगः किञ्च अनधिकृतपदार्थादानप्रदाननिरोधः" विषये व्याख्यानमकरोत्।
- ९-७-२०१९ – "मानवजीवनोपरि योगस्य सकारात्मकाः प्रभावाः" इति विषये एन.के.वसाणिविद्यालये व्याख्यानम्।
- १४-४-२०१९ – विश्वविद्यालये समायोजितस्य वृक्षारोपणकार्यक्रमस्य संयोजनम्।
- २४-७-२०१९ – भक्तकविनरसिंहमहेताविश्वविद्यालये अन्तर्महा-विद्यालय-टेबल्-टेनिस्-स्पर्धायां निर्णायकत्वेन कार्यं विहितम्।
- १०-८-२०१९ – विश्वविद्यालये विश्वसिंहदिवसायोजनस्य संयोजनम्।
- १५-८-२०१९ – विश्वविद्यालये स्वातन्त्र्यदिवसस्य संयोजनम्।
- २९-८-२०१९ – "फिट् इण्डिया" कार्यक्रमस्य संयोजनम्।
- ७ तः ९-९-२०१९ – खेलमहाकुम्भे विविधस्पर्धानां संयोजनम्।

**डॉ. बी. उमा महेश्वरी**

- २०-०५-२०१९ दिनाङ्के काशीहिन्दूविश्वविद्यालयस्थ-संस्कृतविद्याधर्म-विज्ञानसङ्कायस्य दर्शनविभागपक्षतः योगविषयकप्रायोगिकपरीक्षायां निष्णातरूपेण उपस्थितिः।
- १८-०७-२०१९ दिनाङ्के विश्वविद्यालये दर्शनसङ्काये अद्वैतवेदान्तस्य नूतनाभ्यासक्रमनिर्माणसमितौ सङ्कायाध्यक्षत्वेन भागमवाक्षीत्।
- १४-०८-२०१९ दिनाङ्के विश्वविद्यालये आयोजितायाम् एकदिवसीय-राज्यस्तरीयसङ्गोष्ठ्यां भागं गृहीत्वा सत्रसञ्चालनमकरोत्।
- १९-२० सितम्बर २०१९ – विश्वविद्यालयपरिसरे आयोजितायाम् अखिलभारतीयसाहित्यसङ्गोष्ठ्यां भागग्रहणमकरोत्।

**डॉ. जानकीशरण आचार्यः**

- ०१-०४-२०१९ – विश्वविद्यालयस्य "सोमज्योतिः" इति वार्तापत्रस्य नवदशतमस्य अङ्कस्य सम्पादनम्।
- २३-४-२०१९ – लोकसभानिर्वाचने पीठासीनाधिकारिदायित्वं विहितम्।
- १८-०७-२०१९ – विश्वविद्यालये दर्शनसङ्काये अद्वैतवेदान्तविषयस्य नूतनाभ्यासक्रमनिर्माणसमितौ विषयविशेषज्ञरूपेण भागमवाक्षीत्।
- ८ तः १४ ऑगस्ट २०१९ पर्यन्तम् "संस्कृतसप्ताहोत्सवः-२०१९" इत्यस्य संयोजकरूपेण कार्यं सम्पादितम्।
- १९- २० सितम्बर २०१९ – साहित्यसङ्कायेन आयोजितायां "वागर्थविचारः" इति सङ्गोष्ठ्यां भागं गृहीत्वा सत्रसञ्चालनमकरोत्।
- २५ तः २७ सितम्बर २०१९ – विश्वविद्यालयस्य त्रयोदशयुवमहोत्सवे स्पर्धासंयोजकत्वेन कार्यम् अकरोत्।
- प्रकाशनम् – (१) **सोमज्योतिः – अङ्कः १९** (जनवरि २०१९ तः मार्च २०१९ पर्यन्तम्) – सम्पादनम्,(२) **वेदान्तपरिभाषा** (संस्कृतगुर्जर-भाषाद्वयान्विता विमर्शिनीटीकासमेता) ISBN- 978-93-83097-36-4 – सम्पादनम्।

**डॉ. शत्रुघ्नपाणिग्राही**

- 'वैदिकवाङ्मये सूर्यः' इति शोधलेखस्य प्राचीसुधा (ISSN-2249-2313) इति शोधपत्रिकायां (अङ्कः-Oct-2018-March-2019) प्रकाशनम्।
- १२-०९-१९ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालये आयोजिते संस्कृतवाङ्मये गोतत्त्वविमर्शकार्यक्रमे व्याख्यानं प्रदत्तम्।
- गुजरातपाठ्यपुस्तकमण्डलम् इति सर्वकारीयनिकायेन गान्धीनगरे आयोजितायां 'वेद-२' इत्यस्य पाठस्य लेखनकार्ये योगदानम्।
- 'अश्वमेधयागे ब्रह्मोद्यप्रसङ्गः' इति शोधपत्रस्य 'गङ्गावतरणम्' इति अभिनन्दनग्रन्थे प्रकाशनम्।
- 'शुक्लयजुर्वेदे वनस्पतिः' इति शोधपत्रस्य शोधसमीक्षा (ISSN-2249-5045) इति पत्रिकायां प्रकाशनम्।

**डॉ. कार्तिकपण्ड्या**

- २६-२७.०६.२०१९ यावत् विश्वविद्यालयपरिसरे समायोजितायाः द्विदिवसात्मिकायाः NAAC कार्यशालायाः संयोजकत्वं विहितम्।
- गुजरातसर्वकारस्य MYSY/CMSS (2019-20) कृते विश्वविद्यालयपक्षतः गीर-सोमनाथजनदस्य संयोजककार्यं व्यधामयि।
- ११-१०-२०१९ तमे दिनाङ्के विश्वविद्यालयपरिसरे नूतनशिक्षाशास्त्रिमहाविद्यालयार्थं Four(4) Years Innovative & Integrated शास्त्री-शिक्षाशास्त्री अभ्यासक्रमसमित्याः संयोजकत्वं विहितम्।

## द्विदिवसिया NAAC कार्यशाला

नोलेज-कोन्सोर्टियम-ओफ़्-गुजरात (KCG) किञ्च श्रीसोमनाथसंस्कृत-विश्वविद्यालयः इत्यनयोः संयुक्तोपक्रमे २७-६-२०१९ दिनाङ्कतः २८-६-२०१९ दिनाङ्कं यावत् राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः Institutional Accreditation Manual for Self-Study Report of Sanskrit Universities (NAAC) इति विषयमादाय द्विदिवसात्मिका कार्यशाला श्रीसोमनाथसंस्कृत-विश्वविद्यालयपरिसरे समायोजिता आसीत्। विश्वविद्यालयस्य "त्रिवेणी" प्राशासनिकभवने २६-०६-२०१९ दिनाङ्के अस्याः उद्घाटनसत्रं प्रावर्तत। अस्मिन् उद्घाटनकार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रमहाभागः आध्यक्षं निरवहत्। कार्यशालायमस्यां विषयविशेषज्ञरूपेण गुजरातमहाविद्यालय-कर्णावतीतः प्रो. आर.मारु के. शाह किञ्च डॉ. यादवः उपस्थितौ आस्ताम्।



NAAC-विषये प्रशिक्षणं विदधानः डॉ. यादववर्यः

अस्यां कार्यशालायां श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सर्वे प्राध्यापकाः, अधिकारिणः, कर्मचारिणश्च समुपातिष्ठन्। समागताभ्यां विषयविशेषज्ञाभ्यां राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा कथम् अधिकान् अङ्कान् प्राप्य उत्तमः स्तरः अधिगन्तुं शक्यते इति विषये विश्वविद्यालयकार्याणां सप्तधा विभागं कृत्वा सर्वेऽपि प्राध्यापकाः कर्मचारिणश्च सप्तसमूहेषु विभक्ताः आसन्। प्राध्यापकानाम् एतेन विभागसप्तकेन NAAC कृते कथं निर्दिष्टे समये कार्यं साधनीयमिति विषये सम्यक् मार्गदर्शनं विहितम्। अस्याः कार्यशालायाः समापनं २७-०६-२०१९ दिनाङ्के "त्रिवेणी" प्राशासनिकभवनस्य सभागारे अवर्तत। तत्र श्रीसोमनथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः आध्यक्ष्यं निरवहत्। कार्यशलयाः संयोजनं संशोधनाधिकारी डॉ. कार्तिकपण्डया अकरोत्।



NAAC प्रशिक्षणकार्यशालायाम् उपस्थितानां महानुभावानां दृश्यमेकम्

**प्रकाशनम्**

## श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य नूतनं प्रकाशनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयः संस्कृतप्रचारार्थं शास्त्रसंवर्धनार्थं नैकविधान् उपायान् अनुतिष्ठति। तत्र विश्वविद्यालयस्य संशोधन-प्रकाशनविभागेन विभिन्नविदुषां नैके ग्रन्थाः प्राकाश्यम् आनीयन्ते। तत्र लोकप्रियसाहित्यम्, संस्कृतकाव्यम्, शास्त्रग्रन्थाः, अप्रकाशितपाण्डु-लिपिग्रन्थाः, विद्यावारिधिशोधप्रबन्धाः इत्यादिरूपेण विभिन्नानां ग्रन्थानां प्रकाशनं भवति। अप्रैल्-२०१९ तः सितम्बर-२०१९ पर्यन्तं विश्वविद्यालयेन अधोलिखितौ ग्रन्थौ प्रकाशितौ वर्तेते -




**वेदान्तपरिभाषा**
(विमर्शिनी इत्याख्यया संस्कृत-गुर्जर-व्याख्याद्वयसमलङ्कृता)
व्याख्याकारः - **श्रीकेशवलाल शास्त्री**
सम्पादकः - **डॉ. जानकीशरण आचार्यः**
आकारः - रॉयल् ऑक्टेवो
पुटाः - ४३५ मूल्यम् - रू. ९००/-
ISBN - 978-93-83097-36-4




**वैदिकी स्मृतिः**
लेखकः - **डॉ. शत्रुघ्नपाणिग्राही**
आकारः - १/८ डेम्मी
पुटाः - १९९
मूल्यम् - रू. ४००/-
ISBN - 978-93-83097-37-1

एते ग्रन्थाः विश्वविद्यालयस्य ग्रन्थालयविभागात् क्रेतुं शक्यन्ते। तदर्थम् अत्र सम्पर्कः कर्तुं शक्यते -

ग्रन्थपालः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, राजेन्द्रभुवनमार्गः, वेरावलम् - ३६२२६६. (गीरसोमनाथजनपदः) गुजरातम्
अणुवाक् - sssuni.library@gmail.com

## महाविद्यालयवार्ताः

### श्रीनारायणसंस्कृतमहाविद्यालयः, पेटलाद



- १५-०८-२०१९ – प्रतिवर्षानुसारमस्मिन् वर्षे अपि संस्कृतदिवसस्य आयोजनमभवत्। तत्र छात्राध्यापकाचार्याः उत्साहेन भागं गृहीतवन्तः।
- २३ तः २४-०७-२०१९ – 'अलङ्कारतत्त्वविमर्शः' इति विषयमवलम्ब्य व्याख्यानमभवत्। तत्र नडियादस्थस्य श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. अमृतलालभोगायता व्याख्यानम् अकार्षीत्। अस्मिन्नवसरे महाविद्यालयस्य छात्राः अध्यापकाश्च सोत्साहं भागं गृहीत्वा ज्ञानमर्जितवन्तः।

### "दर्शनम्" संस्कृतमहाविद्यालयः, छारोडी



- २१-०६-२०१९ - प्रधानमन्त्रिमहोदयानां श्रीमतां नरेन्द्रमोदीवर्याणां सत्सङ्कल्पेन विश्वयोगदिनोपलक्ष्येन सर्वैः ऋषिकुमारैः साधुभिः छात्रैः इतरैश्च हरिभक्तैः सम्मिल्य विश्वयोगदिनस्य आयोजनं कृतम्।
- वृक्षारोपण कार्यक्रमः - सितम्बर मासे गुजरातसर्वकारेण आयोजितवृक्षारोपण-अभियानान्तर्गतं दर्शनम्-संस्कृतमहाविद्यालयेन शताधिकाः वृक्षाः संस्थायाः परिसरे आरोपिताः। तेन च पर्यावरणस्य रक्षणाय लघुप्रयासः अनुष्ठितः। व्यासपूजनम् – गुरुपूर्णिमायाः अङ्गतया महाविद्यालये व्यासपूजनकार्यक्रमः सवैभवम् आचरितः। तथैव सांस्कृतिककार्यक्रमः अपि समायोजितः आसीत्।

### श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयः, नडियाद



- १० तः ११ जुलाई २०१९ – गुजरातराज्यशाला-पाठ्यपुस्तकमण्डल-गान्धिनगरद्वारा पाठ्यपुस्तक-पुस्तकसंरचनागोष्ठी पद्मश्रीविभूषितस्य डॉ. डाह्याभाईशास्त्रिणः अध्यक्षतायां समायोजिता आसीत्। गोष्ठ्याः संयोजकः प्रधानाचार्यः डॉ. अमृतलाल-भोगायता आसीत्। कार्याध्यक्षया डॉ. कृष्णाबेनदवे-महोदयया गोष्ठ्याः कार्यभारः प्रसारितः। अस्यां प्रायः शताधिकाः विद्वांसो भागं गृहीत्वा लेखनमार्गदर्शनं प्राप्तवन्तः। अस्य महाविद्यालयस्य प्राध्यापकैः छात्रैश्च अन्यकर्मचारिभिः सम्पूर्णमिदं कार्यं सम्पादितम्।
- १६-०७-२०१९ – प्रतिवर्षमिव ऐषमः आषाढशुक्लपूर्णिमायां छात्रैः गुरुपूर्णिमामहोत्सवस्य आयोजनं कृतम्। सर्वैः गुरुभिः छात्रैः च सोत्साहम् उत्सवः सम्पादितः। छात्रैः महोत्सवेऽस्मिन् अङ्गीभूताः कार्यक्रमाः कृताः, तद्यथा सुन्दरकाण्डपाठः, व्यासपूजनम्, गोपूजनम्, शोभायात्रा, गुरुपूजनञ्चेति। कार्यक्रमान्ते गुरुभिः आशीर्वचांसि दत्तानि तथा च जीवने ज्ञानमहत्त्वमिति विषये प्रवचनमपि दत्तम्। कार्यक्रमोऽयं गुरुशिष्ययोः कृते स्नेहसेतुरिव अभवत्।



- ०७-०८-२०१९ – संस्कृतसप्ताहोत्सवं लक्ष्यीकृत्य विविधपरीक्षासु उत्तमोत्तमपरिणामप्राप्तवतां विद्यार्थिनां कृते सत्कारकार्यक्रमः समायोजितः। अत्र श्रीसन्तराममन्दिरस्थाः सन्तोऽपि आशीर्वचांसि उक्तवन्तः। पद्मश्री डॉ. डाह्याभाई शास्त्रिणो छात्रान् समबोधयन्, विविधप्रवृत्तिप्रवृत्तेभ्यः छात्रेभ्यः प्रधानाचार्येण प्राध्यापकैश्च धन्यवादपुरस्सरं भूयांसि अभिनन्दनानि प्रदत्तानि।
- ७ तः ऑगस्ट २०१९ पर्यन्तम् प्रतिवर्षानुसारं पद्मश्री डॉ. डाह्याभाईशास्त्रिवर्याणां प्रेरणया अध्यापकानां मार्गदर्शनेन च संस्कृतसप्ताहः समाचरितः। अस्मिन् कार्यक्रमे सर्वे छात्राः विविधासु स्पर्धासु भागं स्वीकृतवन्तः। अन्तिमदिवसे ये छात्राः यासु स्पर्धासु विजयं प्राप्तवन्तः, ते छात्राः पुरस्कारेण पुरस्कृताः।



- पद्मश्री डॉ. डाह्याभाईशास्त्रिवर्याणां प्रेरणया, प्राचार्यस्य डॉ. अमृतलालभोगायतावर्यस्य किञ्च इतरेषाम् अध्यापकानां मार्गदर्शनेन १२ तः १८ सितम्बरतः २०१९ पर्यन्तं व्याकरणकार्यशाला सम्पन्ना। कार्यशालायाः अध्यक्षत्वेन पद्मश्री डॉ. डाह्याभाईशास्त्रिणः तथा च संयोजकौ डॉ. क्षितीश्वरनाथपाण्डेयः प्रदीप जोषी च आस्ताम्। अत्र ऋषभभाई त्रिवेदी, रघुभाई जोशी, रविशङ्कर राजगोरः, डॉ. क्षितीश्वरनाथ-पाण्डेयः, प्राचार्यः डॉ. अमृतलालभोगायता च अध्यापनकर्म अकार्षुः। अस्यां कार्यशालायां आहत्य १९६ छात्राः भागं स्वीकृतवन्तः।

## BAPS स्वामिनारायणसंस्कृतमहाविद्यालयः, सारङ्गपुरम्




- २१-७-२०१९ दिनाङ्के महाविद्यालये शास्त्रिप्रथमकक्षारभ्य शोधच्छात्रपर्यन्तं विभागानुसारं शलाकास्पर्धा समायोजिता। "स्वामिनारायणदर्शनग्रन्थेषु स्वामिनारायणसिद्धान्तसुधा" इति वादग्रन्थमधिकृत्य कारिकाणामुपरि 'मुखपाठः, सार्थभाषणम्, शास्त्रार्थश्च' इति विभागत्रये प्रतियोगिता सञ्जाता। पूज्यपादभद्रेशस्वामिभिः प्राचार्याऽऽत्मतृप्तस्वामिभिः इतरैश्च शिक्षकैः मुखपाठपरम्परायाः वैज्ञानिक-लाभाः नैकमाध्यमेन बोधिताः किञ्च एतद्विषये मार्गदर्शनम् अदीयत। छात्रोन्नतिप्रोत्साहनार्थम् एकसहस्ररूप्यकाणि यावत्पारितोषिकं कृतभूरिपरिश्रमच्छात्रेभ्यः विजेतृभ्यः प्रतिभागिभ्यः प्रदत्तम्। स्पर्धान्ते यज्ञपुरुषस्मृतिमन्दिरेऽपि कारिकापारायणमक्रियत।




- १८-०४-२०१९ तः ३०-०४-२०१९ पर्यन्तं महाविद्यालस्थच्छात्रेभ्यः काशीनगरस्थः प्रो. रामकिशोर-त्रिपाठीवर्यः द्वादशदिनपर्यन्तं प्रतिदिनम् अद्वैतवेदान्तदर्शनं न्यायदर्शनञ्च अपाठयत्। एतेन सह त्रिपाठिमहोदयेन महाविद्यालयच्छात्रोत्साहं ग्रहणशक्तिं बुद्धिचातुर्यादिकमवलोक्य प्रसन्नीभूय मार्गदर्शनं प्रेरणा च प्रदत्ता। कार्यक्रमोऽयं संस्कृतभाषायै शास्त्राऽभ्यासाय च महदुपकारको जातः।



- महाविद्यालये संस्कृतभाषापरिवृध्द्यर्थं प्रतिमासं वाग्वर्धिनी सभा आयोज्यते। यत्र गीताभागवत-पुराणोपनिषद्ब्रह्मसूत्रादिग्रन्थेषु प्रवचनम्, वादविवादः, संवादः, गानम्, गहनचर्चा, प्रश्नोत्तरसत्रम्, शोधपत्रम्, दृश्यश्राव्यकार्यक्रमाः किञ्च स्वरचनाप्रस्तुतिः छात्रैः प्रस्तूयते। इत्थमियं वाग्वर्धिनीसभा छात्राणां वाक्कौशलवर्धनाय स्वप्रातिभप्रदर्शनाय च अत्यन्तम् उपकारिणी वर्तते।
- संस्कृतभाषावदेव संस्कृतिसंरक्षणार्थं महाविद्यालयः प्रयतते। १५ तः ३०-०७-२०१९ दिनाङ्कपर्यन्तं रामायणादिसंस्कृतिनिरूपकेतिहासग्रन्थानामुपरि सर्वे छात्राः समीपस्थं सोढी-हेबतपर-सेंथळी-ढींकवाळी-धोराजी-कुण्डलादि ग्रामं प्रति विचरणं विधाय प्रवचनमश्रावयन्। संस्कृतिप्रचारप्रसारणार्थं साप्ताहिकपर्व एव आयोजितम्।
- २५ तः ३०-८-२०१९ पर्यन्तं षड्दिवसीयशास्त्रमहोत्सवः समायोजितः। विविधच्छात्राः संस्कृतश्लोकसुभाषितोक्त्यादिं प्रयुज्य ग्रन्थसारं चोदीर्य सर्वान् अतोषयन्। अस्मिन्महाविद्यालयैव विविधश्रोतृरूपेण सन्तो भक्ताश्चापि समागत्य छात्रवक्तॄन् अशृण्वन्।
- हिन्दीभाषायां 'भाषावर्धिनी', आङ्ग्लभाषायां 'एक्सप्रेशन्' इत्यादिसभाः प्रतिमासं परियोज्यन्ते तथा च प्रतिसप्ताहं रविसभायामपि संस्कृत्युन्नतिकारकप्रवचनादिकम् आकर्ण्य सर्वे प्राप्तप्रेरणाः भवन्ति। विविधभाषासु आयोज्यमानाः इमाः परिषदः छात्राणां विविधभाषाभाषणस्य कौशलं संवर्ध्य छात्राणां प्रातिभविकासं कुर्वन्ति।

## श्रीडाकोरसंस्कृतमहाविद्यालयः, डाकोर



- २१-०६-२०१९ – अन्ताराष्ट्रियोगदिवसमुपलक्ष्य महाविद्यालयस्य शताधिकाः छात्राः अध्यापकाः कर्मचारिणः नागराश्च सम्भूय सामूहिकयोगाभ्यासम् अकार्षुः। अस्मिन् अन्ताराष्ट्रिययोगदिवसस्य कार्यक्रमे श्रीडाकोरसंस्कृतपाठशालायाः सर्वे अध्यापकाः, कर्मचारिणः, छात्रा, महाविद्यालयन्यासस्य अधिकारिणश्च उपस्थिताः आसन्। अस्मिन्नवसरे प्राचार्यः डॉ. अजयठाकोरः समुपस्थितेभ्यः जीवने योगस्य महत्त्वम् प्राकाशयत्। अस्मिन् कार्यक्रमे महाविद्यालयस्य सर्वेऽपि छात्राः, प्राध्यापकाः, डाकोरनगरस्य नागराश्च सोत्साहं भागम् अवाक्षुः।
- ८ तः १५ ऑगस्ट २०१९ – प्रतिवर्षानुसारम् अस्मिन्नपि वर्षे प्राचार्यस्य डॉ. अजयठाकोरवर्यस्य मार्गदर्शने 'संस्कृतसप्ताहोत्सवः' समाचरितः यत्र विविधस्पर्धानां सम्यक् आयोजनम् अक्रियत। प्रथमातः आचार्यकक्षापर्यन्तं छात्राणां कृते संस्कृतगीतम्, काव्यकण्ठपाठः, सूत्राष्टाध्यायीकण्ठपाठः, गीताकण्ठपाठः, श्लोकान्त्याक्षरी, वक्तृत्वस्पर्धा, स्फूर्तिस्पर्धा, अभिनयस्पर्धा, चित्रस्पर्धा, रङ्गवल्लीस्पर्धा, निबन्धस्पर्धा च समायोजिताः आसन्। १५-८-२०१९ दिनाङ्के श्रावणीप्रयोगः, स्वतन्त्रतादिवसाचरणम्, संस्कृतसप्ताहोत्सवस्य समापनसमारोहश्च समाचरितः आसीत्। संस्कृतसप्ताहोत्सवस्य समापनसमारोहे विविधस्पर्धासु विजेतृणां छात्राणां कृते पुरस्कारादिकं प्रदत्तम्।

## श्रीनर्मदासंस्कृतवेदमहाविद्यालयः, भृगुकच्छम्



- २७-८-२०१९ – परमोत्कर्षसाधकस्य संस्कृतसंस्कृतिसंवर्द्धकस्य डॉ. पद्मनाभतापीशङ्करदवेमहाभागस्य सम्माननकार्यक्रमः तपोवनसङ्कुलसञ्चालिते श्रीनर्मदासंस्कृतवेदमहाविद्यालये सुचारुतया अजायत। अस्मिन् सम्माननकार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः विशेषातिथिरूपेण समुपातिष्ठत्। मिश्रमहोदयेन तपोवनस्य प्रशंसाविषये अभाणि यत् विना तपः सर्वं वनमेव भवति, अतः वेदशास्त्रसाहित्यादिभिः पूतमिदं तपोवनमिदं संस्कृतमातुः सेवामाध्यमेन नितरां राराज्यते एव। कुलपतिवर्यः 'रात्रिन्दिवं गन्धवहं प्रयाति' इति कालिदासोक्तिं स्मारयन् श्रीदिनेशभाईपण्ड्यावर्यस्य सभाजनमपि अकरोत्। प्रसङ्गेऽस्मिन् ऋषिकुमारैः सोत्साहं 'उद्यमेन हि सिध्यन्ति कार्याणि' इत्याख्यं नाटकमपि अभिनीतम्। अत्र भृगुकच्छजनपदस्य धारासभ्यः श्रीदुष्यन्त पटेलः, दक्षिणगुजरातविश्वविद्यालयस्य कुलपतिचरः श्रीअश्विनभाई कापडीया, विविधविद्यालयीयाः अध्यापकाः, नैके महानुभावाः, पाठशालापरिवारश्च स्वीयां पावनीम् उपस्थितिं प्रदाय कार्यक्रमममुं सफलीकृतवन्तः।

# चित्रवार्ताः



गान्धिनगरस्थ-राज्यपालभवने शिक्षणमन्त्रि-प्रधानशिक्षण-सचिवादिभिः सह उपवेशनसन्दर्भे राष्ट्रिय-कामधेनु-आयोगस्य अध्यक्षेण माननीयेन डॉ. वल्लभभाईकथिरियावर्येण सह संस्कृतविषये भाषमाणः माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रवर्यः। वामभागे अस्ति श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य कुलसचिवः डॉ. दशरथजादवः।(०६-०६-२०१९ )



भागवतकथावाचकस्य डॉ. महादेवप्रसादमहेतावर्यस्य कथायां कुलपतेः प्रो. गोपबन्धुमिश्रस्य उपस्थितिः। डॉ. महेतावर्येण संस्कृताध्ययनविषये श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्रशंसा कृता आसीत्।(१६-०४-२०१९)



Tata Consultancy Services संस्थाद्वारा सञ्चालिते संस्कृतभाषायाः प्रचारप्रसारार्थं TCS iON इत्याख्ये प्रकल्पे सर्वेषां संस्कृतविश्वविद्यालयानां कुलपतीनां चर्चागोष्ठ्या श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः एतस्मिन् विषये मार्गदर्शनम् अकरोत्।(२०-१०-२०१९ )



हरियाणास्थ-महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रेयांसद्विवेदी श्रीसोमनाथसंस्कृतविश्वविद्यालये साक्षात्काराय आगतवान्। कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चनादुबे, प्रो. देवेन्द्रनाथपाण्डेयश्च च प्रो. द्विवेदिनः स्वागतं कृतवन्तः।(०६-०७-२०१९ )

# Shree Somnath Sanskrit University

(Established by Goverment of Gujarat in 2005)

Rajendra Bhuvan Road, Veraval - 362 266. Dist.: Gir - Somnath (Gujarat) INDIA

Invites you for Three Day International Conference on

## Tradition of Commentaries and the Dynamics of Knowledge

## (भाष्यपरम्परा ज्ञानप्रवाहश्च)

11, 12 & 13 February, 2020

Venue

Shree Somnath Sanskrit University

Rajendra Bhuvan Road, Veraval-362 266 Gir Somnath (Gujarat) INDIA

## Important dates

| 31[th] October 2019 | 10[th] December 2019 | 15[th] January 2020 |
|---|---|---|
| **Last day for abstract submission** | **Communication of acceptance of abstract** | **Submission of full papers** |



अस्य अन्ताराष्ट्रियपरिसंवादस्य विशेषाः -

**१. विश्रुतविदुषां शास्त्रीयव्याख्यानानि**

**२. विशिष्टायाः अष्टावधानकलायाः प्रदर्शनम् (११.०२.२०२०)**

**३. पण्डितपरमानन्दशास्त्रिस्मृतौ संस्कृतकविसम्मेलनम् (१२.०२.२०२०)**





Chief-Coordinator : **Prof. D. N. Pandeya** Registrar : **Dr. Dasharath Jadav**

For any queries regarding this Conference, please contact

**Prof. Devendra Nath Pandeya**, Chief-Coordinator Mobile : 93287 07436

**Dr. Dipesh Vinod Katira**, Coordinator Mobile : 95943 56857

**Dr. Janakisharan Acharya**, Coordinator Mobile : 87588 17525

**Shree Somnath Sanskrit University**

Rajendra Bhuvan Road, Veraval-362 266 Dist. Gir Somnath (Gujarat) INDIA

Ph. : 02876-244532 Fax : 02876-244417

Website : www.sssu.ac.in Email : sssu.conference@gmail.com